
---

## LIBER SEXTUS.

Vrihadasvus dixit:

1. Electo vero Naischadho a Bhaimia, mundi custodes magno-splendore |
2. euntes viderunt adeuntem Dvâparum cum Cale. || Tum dixit Cali Sacrus, tuitus, Bali- *et* Vritri-occisor: | Cum Dvâparo comite, Calis! dic,
3. quo ibis? || Deinde dixit Calis Sacro: Ad Damayantiae propriam-*mariti* electionem; | aggressus enim eligam eam, cor enim meum eam ingres-
4. sum *est.* || Ei dixit cum risu Indrus: finita *est* illa electio; | electus
5. ab ea Nalus rex conjux, nobis-coram. || Sic compellatus vero a Sacro Calis, ira-affectus, | Deos postquam salutaverat eos cunctos, dixit hunc

देवानाम् मानुषम् मध्ये यत् सा पतिम् अविन्दत ।
तत्र तस्या भवेन् न्याय्यं विपुलन् दण्डधारणम् ॥ ६ ॥
एवम् उक्ते तु कलिना प्रत्यूचुस् ते दिवौकसः ।
अस्माभिः समनुज्ञाते दमयन्त्या नलो वृतः ॥ ७ ॥
का च सर्वगुणोपेतन् ना ”श्रयेत नलन् नृपम् ।
यो वेद धर्मान् अखिलान् यथावच् चरितव्रतः ॥ ८ ॥
यो ऽधीते चतुरो वेदान् सर्वान् आख्यानपञ्चमान् ।
नित्यन् तृप्ता गृहे यस्य देवा यज्ञेषु धर्मतः ॥ ९ ॥
अहिंसानिरतो यश् च सत्यवादी दृढव्रतः ।
यस्मिन् दाक्ष्यन् धृतिर् दानन् तपः शौचन् दमः शमः ॥१०॥
ध्रुवाणि पुरुषव्याघ्रे लोकपालसमे नृपे ।

---

6. sermonem tunc: ॥ Deorum hominem in medio quia illa conjugem in-
7. venit, । ideo ejus sit justum magnum supplicium. ॥ Eo dicto vero a
Cale, responderunt illi coelicolae: । a nobis permisso, a Damayantia
8. Nalus *est* electus. ॥ Quae vero omnibus-virtutibus-praeditum non
propenderet in Nalum regem? । qui noscit officia omnia, convenien-
9. ter agendi studiosus; ॥ qui legit quatuor *Vêdos* totos, Akhyânum-
*tanquam* quintum *habentes,* । semper satiati in domo cujus Dii in sa-
10. crificiis juste; ॥ clementiae-deditus qui etiam, veridicus, firma-vota
*habens,* । in quo probitas, constantia, munificentia, devotio, puritas,
11. temperantia, patientia, ॥ perpetua (sunt), hominum-principe, mundi-

एवंरूपन् नलं यो वै कामयेच् छपितुङ् कले ॥ ११ ॥
आत्मानं स शपेन् मूढो हन्याद् आत्मानम् आत्मना ।
एवङ्गुणान् नलं यो वै कामयेच् छपितुङ् कले ॥ १२ ॥
कृच्छ्रे स नरके मज्जेद् अगाधे विपुले ह्रदे ।
एवम् उक्त्वा कलिन् देवा द्वापरञ् च दिवं ययुः ॥ १३ ॥
ततो गतेषु देवेषु कलिर् द्वापरम् अब्रवीत् ।
संहर्तुन् नो ऽत्सहे कोपन् नले वत्स्यामि द्वापर ॥ १४ ॥
भ्रंशयिष्यामि तं राज्यान् न भैम्या सह रंस्यते ।
त्वम् अप्य् अक्षान् समाविश्य कर्तुं साहाय्यम् अर्हसि ॥ १५ ॥

॥ इति नलोपाख्याने षष्ठः सर्गः ॥ ६ ॥

---

custodibus-simili rege; । tali-indole *praeditum* Nalum qui sane velit
12. exsecrari, Calis! ॥ se ipsnm iste exsecretur stultus, occidat se ipsum
per se ipsum; । talibus-virtutibus *praeditum* Nalum qui sane velit
13. exsecrari, Calis! ॥ in tormentuoso iste tartaro mergatur; in profunda
ingente palude. । Sic fati ad Calem Dii Dvâparumque, in coelum
14. iverunt. ॥ Deinde, profectis Diis, Calis Dvâparo dixit: । Cohibere
15. non possum iram; in Nalo habitabo, Dvâpare! ॥ praecipitabo eum e
regno, non cum Bhaimia voluptatibus fruetur. । Tu vero, talos ingressus, facere auxilium velis. ॥

### वृहदश्व उवाच

एवं स समयङ् कृत्वा द्वापरेण कलिः सह ।
आजगाम ततस् तत्र यत्र राजा स नैषधः ॥ १ ॥
स नित्यम् अन्तरप्रेप्सुर् निषधेष्व् अवसच् चिरम् ।
अथा ऽस्य द्वादशे वर्षे ददर्श कलिर् अन्तरम् ॥ २ ॥
कृत्वा मूत्रम् उपस्पृश्य सन्ध्याम् अन्वास्त नैषधः ।
अकृत्वा पादयोः शौचन् तत्रै ऽनङ् कलिर् आविशत् ॥ ३ ॥
स समाविश्य च नलं समीपम् पुष्करस्य च ।
गत्वा पुष्करम् आहे ऽदम् एहि दीव्य नलेन वै ॥ ४ ॥
अक्षद्यूते नलञ् जेता भवान् हि सहितो मया ।

---

## LIBER SEPTIMUS.

### Vrihadasvus dixit:

1. Sic is conventum postquam fecerat cum Dvâparo Calis, | adiit tum
2. illuc, ubi rex ille Naischadhus. ‖ Is semper occasionem-captans in
Nischadhis habitabat diu. | At ejus, duodecimo anno, vidit Calis oc-
3. casionem. ‖ Qui fecerat urinam, *et eam* calcaverat, crepusculo, se-
debat Naischadhus, | non-facta pedum purificatione; hac *occasione*
4. cum Calis ingressus est. ‖ Is ingressusque Nalum, ad Pushcarum-
5. que | profectus, Pushcaro dixit hoc: Veni, lude cum Nalo; ‖ in ta-

निषधान् प्रतिपद्यस्व जित्वा राज्यन् नलन् नृपम् ॥५॥
एवम् उक्तस् तु कलिना पुष्करो नलम् अभ्ययात् ।
कलिश् चै 'व वृषो भूत्वा गवाम् पुष्करम् अभ्ययात् ॥६॥
आसाद्य तु नलं वीरम् पुष्करः परवीरहा ।
दीव्यावे 'त्य् अब्रवीद् भ्राता वृषेणे 'ति मुहुर् मुहुः ॥७॥
न चक्षमे ततो राजा तम् आह्वानम् महामनाः ।
वैदर्भ्याः प्रेक्षमाणायाः पणकालम् अमन्यत ॥८॥
हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम् ।
आविष्टः कलिना द्यूते जीयते स्म नलस् तदा ॥९॥
तम् अक्षमदसम्मत्तं सुहृदान् न तु कश्चन ।
निवारणे ऽभवच् छक्तो दीव्यमानम् अरिन्दमम् ॥१०॥

---

lorum-ludo vinces tu enim, adjutus a me. | Nischadhos adipiscere,
6. vincendo regnum, Nalum regem. || Sic compellatus vero a Cale,
Pushcarus Nalum adiit; | Calisque etiam, taurus factus boum, Push-
7. carum adiit. || Aggressus vero Nalum heroem, Pushcarus hostium-
heroum-occisor, | «Ludamus,» sic dixit frater, «talo eximio;» sic
8. iterum iterum. || Non sustinuit tum rex provocationem magnâ-mente
9. *praeditus* | Vaidarbhiâ spectante ludendi-tempus putavit || de opibus,
auro, currûs-jugo, vestibus. | Intratus a Cale in ludo vincebatur
10. Nalus tunc. || Eum, talorum-furore-dementem, amicorum non vero
quispiam | avertendi erat potens ludentem hostium-domitorem. ||

ततः पौरजनाः सर्वे मन्त्रिभिः सह भारत ।
राजानन् द्रष्टुम् आगच्छन् निवारयितुम् आतुरम् ॥ ११ ॥
ततः सूत उपागम्य दमयन्त्यै न्यवेदयत् ।
एष पौरजनो देवि द्वारि तिष्ठति कार्यवान् ॥ १२ ॥
निवेद्यतान् नैषधाय सर्वाः प्रकृतयः स्थिताः ।
अमृषमाणा व्यसनं राज्ञो धर्मार्थदर्शिनः ॥ १३ ॥
ततः सा बाष्पकलया वाचा दुःखेन कर्षिता ।
उवाच नैषधम् भैमी शोकोपहतचेतना ॥ १४ ॥
राजन् पौरजनो द्वारि त्वान् दिदृक्षुर् अवस्थितः ।
मन्त्रिभिः सहितः सर्वै राजभक्तिपुरस्कृतः ।
तन् द्रष्टुम् अर्हसी ’त्य् एव पुनः पुनर् अभाषत ॥ १५ ॥

---

11. Deinde cives omnes cum consiliariis, Bhârate! | regem visum adve-
12. nerunt, ad arcendum aegrotum. || Tum auriga, aggressus, Damayantiae denuntiavit: | haec civitas, regina! ad portam stat officiosa. ||
13. Nuntietur Naischadho: «Cuncti subditi adstantes, | non sustinentes
14. calamitatem regis, juris-rem-cernentis.» || Deinde illa, lacrymis-oppressâ-voce, dolore tracta, | dixit Naischadho Bhaimia moestitiâ-
15. perculso-animo: || «Rex, civitas ad portam te videndi-cupida stans, | cum consiliariis conjuncta omnibus, regis-cultu-ducta; | eam videre
16. velis;» sic nempe iterum iterum dixit. || Ei tam pulchris-oculorum

तान् तथा रुचिरापाङ्गीं विलपन्तीन् तथाविधम् ।
आविष्टः कलिना राजा ना 'भ्यभाषत किञ्चन ॥१६॥
ततस् ते मन्त्रिणः सर्वे ते चै 'व पुरवासिनः ।
ना 'यम् अस्ती 'ति दुःखार्त्ता व्रीडिता जग्मुर् आलयान् ॥१७॥
तदा तद् अभवद् द्यूतम् पुष्करस्य नलस्य च ।
युधिष्ठिर बहून् मासान् पुण्यश्लोकस् त्व् अजीयत ॥१८॥

॥ इति नलोपाख्याने सप्तमः सर्गः ॥ ७ ॥

## बृहदश्व उवाच

दमयन्ती ततो दृष्ट्वा पुण्यश्लोकन् नराधिपम् ।

---

angulis *praeditae,* lamentanti tali-modo, I intratus a Cale rex non
17. dixit quidpiam. II Deinde illi consiliarii cuncti, illique etiam urbis-
habitatores, I «non iste est;» sic (dicentes), dolore-afflicti, pudibundi
18. iverunt in domicilia. II Tum ille erat ludus Pushcari Nalique, I Yu-
dhishthire! multos menses; Punyaslôcus vero vincebatur. II

## LIBER OCTAVUS.

### Vrihadasvus dixit:

1. Damayantia tum, tuita Punyaslôcum hominum-regem I dementem-

उन्मत्तवद् अनुन्मत्ता देवने गतचेतसम् ॥ १ ॥
भयशोकसमाविष्टा राजन् भीमसुता ततः ।
चिन्तयामास तत् कार्यं सुमहत् पार्थिवम् प्रति ॥ २ ॥
सा शङ्कमाना तत्पापञ् चिकीर्षन्ती च तत्प्रियम् ।
नलञ् च हृतसर्वस्वम् उपलभ्ये 'दम् अब्रवीत् ॥ ३ ॥
बृहत्सेनाम् अतियशास् तान् धात्रीम् परिचारिकाम् ।
हितां सर्वार्थकुशलाम् अनुरक्तां सुभाषिताम् ॥ ४ ॥
बृहत्सेने व्रजा 'मात्यान् आनाय्य नलशासनात् ।
आचक्ष्व यद् धृतन् द्रव्यम् अवशिष्टञ् च यद् वसु ॥ ५ ॥
ततस् ते मन्त्रिणः सर्वे विज्ञाय नलशासनम् ।
अपि नो भागधेयं स्याद् इत्य् उक्त्वा नलम् आव्रजन् ॥ ६ ॥

---

2. quasi, non-demens, in ludo expertem-mentis, ‖ timore-moerore-
affecta, rex! Bhîmi-filia tum | consideravit hoc negotium permagnum
3. regem circa. ‖ Ea timens illius-vitium, facere cupiensque illius-
carum, | Nalumque privatum-omni-proprio cum vidit, hoc dixit ‖
4. Vrihatsênae pergloriosa, illi nutrici servae, | bonae, omnium-re-
5. rum-peritae, deditae, facundae: ‖ «Vrihatsêna! i, consiliariis ad-
ductis Nali-jussu, | dic quae capta res, relictaque quae gaza.» ‖
6. Deinde illi consiliarii cuncti, cognito Nali-jussu, | «etiam nostrum
7. fatum sit,» sic locuti, Nalum adierunt. ‖ Illi quoque omnes subditi

तास् तु सर्वाः प्रकृतयो द्वितीयं समुपस्थिताः ।
न्यवेदयद् भीमसुता न स तत् प्रत्यनन्दत ॥ ७ ॥
वाक्यम् अप्रतिनन्दन्तम् भर्तारम् अभिवीक्ष्य सा ।
दमयन्ती पुनर् वेश्म व्रीडिता प्रविवेश ह ॥ ८ ॥
निशम्य सततञ् चा ऽक्षान् पुण्यश्लोकपराङ्मुखान् ।
नलञ् च हृतसर्वस्वन् धात्रीम् पुनर् उवाच ह ॥ ९ ॥
वृहत्सेने पुनर् गच्छ वार्ष्णेयन् नलशासनात् ।
सूतम् आनय कल्याणि महत् कार्यम् उपस्थितम् ॥ १० ॥
वृहत्सेना तु तच् छ्रुत्वा दमयन्त्याः प्रभाषितम् ।
सूतम् आनाययामास पुरुषैर् आप्तकारिभिः ॥ ११ ॥
वार्ष्णेयन् तु ततो भैमी सान्त्वयन् श्लक्ष्णया गिरा ।

---

secundum aggressi (sunt). I Nuntiavit Bhîmi-filia; non ille hoc at-
8. tendit. II Sermonem non attendentem conjugem tuita ea, I Dama-
9. yantia rursus domum pudibunda intravit. II Cum percepit semperque
talos a Punyaslôco-aversos, I Nalumque privatum-omni-proprio,
10. nutrici iterum dixit: II «Vrihatsêna! i iterum, ad Vârshnêyum, Nali-
jussu; I aurigam adduc, eximia! magnum negotium *est* aggressum.» II
11. Vrihatsêna vero, hoc audito Damayantiae dicto, I aurigam adducen-
12. dum curavit a viris apte-agentibus. II Vârshnêyo vero tum Bhaimia
blandiens leni voce, I fata est loci-temporis-gnara ad aggressum-

उवाच देशकालज्ञा प्राप्तकालम् अनिन्दिता ॥ १२ ॥
जानीषे त्वं यथा राजा सम्यग्वृत्तः सदा त्वयि ।
तस्य त्वं विषमस्थस्य साहाय्यङ् कर्तुम् अर्हसि ॥ १३ ॥
यथा यथा हि नृपतिः पुष्करेणे 'व जीयते ।
तथा तथा 'स्य वै द्यूते भूयो रागो ऽभिवर्धते ॥ १४ ॥
यथा च पुष्करस्या 'क्षाः पतन्ति वशवर्तिनः ।
तथा विपर्ययश् चा 'पि नलस्या 'क्षेषु दृश्यते ॥ १५ ॥
सुहृत्स्वजनवाक्यानि यथावन् न शृणोति च ।
मम चा 'पि तथा वाक्यन् ना 'भिनन्दति मोहितः ॥ १६ ॥
नूनम् मन्ये न दोषो ऽस्ति नैषधस्य महात्मनः ।
यत्र मे वचनं राजा ना 'भिनन्दति मोहितः ॥ १७ ॥

---

13. tempore (conveniente) non-spreta: ॥ Noscis tu sicut rex omnino fretus
14. semper te; । huic tu in difficultate-stanti auxilium facere velis. ॥ Ut ut
enim rex a Pushcaro nempe vincitur, । ita ita illius sane in ludo plus
15. cupido accrescit. ॥ Sicutque Pushcari tali cadunt ad arbitrium-versan-
16. tes, । ita contrariumque etiam Nali in talis cernitur. ॥ Amicorum- *et*
cognatorum-sermones convenienter non auscultatque, । meumque etiam
17. ita sermonem non attendit stultus. ॥ Certe, credo, non vitium est
Naischadhi magnanimi, । quod meum sermonem rex non attendit

शरणान् त्वाम् प्रपन्ना 'स्मि सारथे कुरु मद्वचः ।
न हि मे शुध्यते भावः कदाचिद् विनशेद् अपि ॥ १८ ॥
नलस्य दयितान् अश्वान् योजयित्वा मनोजवान् ।
इदम् आरोप्य मिथुनङ् कुन्दिनं यातुम् अर्हसि ॥ १९ ॥
मम ज्ञातिषु निक्षिप्य दारकौ स्यन्दनन् तथा ।
अश्वांश् चे 'मान् यथाकामं वस वा 'न्यत्र गच्छ वा ॥ २० ॥
दमयन्त्यास् तु तद् वाक्यं वार्ष्णेयो नलसारथिः ।
न्यवेदयद् अशेषेण नलामात्येषु मुख्यशः ॥ २१ ॥
तैः समेत्य विनिश्चित्य सो ऽनुज्ञातो महीपते ।
ययौ मिथुनम् आरोप्य विदर्भांस् तेन वाहिना ॥ २२ ॥
हयांस् तत्र विनिक्षिप्य सूतो रथवरञ् च तम् ।

---

18. stultus. ‖ In refugium ad te profecta sum, auriga! fac meum-sermonem; | non enim meus serenatur animus, aliquando perire possit
19. etiam. ‖ Nali caris equis junctis *sicut* mens-velocibus, | hoc postquam
20. imposueris par *puerorum*, Cundinum ire velis. ‖ Meos apud propinquos postquam tradideris liberos, vehiculum ita, | equosque eos, ad-
21. libidinem habitave, aliorsum vadeve. ‖ Damayantiae vero hunc sermonem Vârshnêyus Nali-auriga | denuntiavit plane Nali-consiliariis
22. praecipuis. ‖ Cum iis congressus postquam perpenderat, is, assensum adeptus, terrae-domine! | Ivit, par *puerorum* postquam imposuerat,
23. in Vidarbhos illo curru. ‖ Equos ibi postquam tradiderat auriga,

इन्द्रसेनाञ् च ताङ् कन्याम् इन्द्रसेनञ् च बालकम् ॥ २३ ॥
आमन्त्र्य भीमं राजानम् आर्तः शोचन् नलन् नृपम् ।
अटमानस् ततो ऽयोध्याञ् जगाम नगरीन् तदा ॥ २४ ॥
ऋतुपर्णं स राजानम् उपतस्थे सुदुःखितः ।
भृतिम् उपययौ तस्य सारथ्येन महीपतेः ॥ २५ ॥
॥ इति नलोपाख्याने अष्टमः सर्गः ॥ ८ ॥

बृहदश्व उवाच
ततस् तु याते वार्ष्णेये पुण्यश्लोकस्य दीव्यतः ।
पुष्करेण हृतं राज्यं यच् चा ऽन्यद् वसु किञ्चन ॥ १ ॥

---

curuum-decusque illud, | Indrasênamque puellam, Indrasênumque
24. puerculum; || salutato Bhîmo rege, moestus, miserans Nalum regna-
25. torem, | vadens illinc, Ayodhyam ivit urbem tum. || Rituparnum is
regem aggressus est perafflictus, | mercedem iniit hujus, aurigatione,
terrae-domini. ||

## LIBER NONUS.

Vrihadasvus dixit:

1. Deinde vero, profecto Vârshnêyo, Punyaslôci ludentis | a Pushcaro

हृतराज्यम् नलं राजन् प्रहसन् पुष्करो ऽब्रवीत् ।
द्यूतम् प्रवर्तताम् भूयः प्रतिपाणो ऽस्ति कस् तव ॥ २ ॥
शिष्टा ते दमयन्त्य् एका सर्वम् अन्यज् जितम् मया ।
दमयन्त्याः पणः साधु वर्ततां यदि मन्यसे ॥ ३ ॥
पुष्करेणै 'वम् उक्तस्य पुण्यश्लोकस्य मन्युना ।
व्यदीर्यते 'व हृदयम् न चै 'नं किञ्चिद् अब्रवीत् ॥ ४ ॥
ततः पुष्करम् आलोक्य नलः परममन्युमान् ।
उत्सृज्य सर्वगात्रेभ्यो भूषणानि महायशाः ॥ ५ ॥
एकवासा ह्य् असंवीतः सुहृच्छोकविवर्धनः ।
निश्चक्राम ततो राजा त्यक्त्वा सुविपुलां श्रियम् ॥ ६ ॥
दमयन्त्य् एकवस्त्रा 'थ गच्छन्तम् पृष्ठतो ऽन्वयात् ।

---

2. captum *est* regnum, et quae alia res ulla. ‖ Privatum-regno ad Nalum, rex! ridens Pushcarus fatus est: | ludus versetur ultra! Contraposi-
3. tum est quid tuum? ‖ Relicta tibi Damayantia una, omne aliud vic-
4. tum a me; | de Damayantia ludus, agedum! versetur, si putas. ‖ A Pushcaro sic compellati Punyaslôci moerore | laceratum est quasi
5. cor, neque illi quidpiam dixit. ‖ Deinde Pushcarum intuitus Nalus, maxime-moestus, | postquam exuerat toto-corpore ornamenta magnâ-
6. gloriâ *praeditus,* ‖ unâ-veste *indutus,* non-tectus, amicorum-moeroris-amplificator, | egressus est tum rex, qui reliquit peringentem
7. felicitatem. ‖ Damayantia unâ-veste *induta* autem euntem a tergo

स तया वाह्यतः सार्धन् त्रिरात्रन् नैषधो ऽवसत् ॥७॥
पुष्करस् तु महाराज घोषयामास वै पुरे ।
नले यः सम्यग् आतिष्ठेत् स गच्छेद् वध्यताम् मम ॥८॥
पुष्करस्य तु वाक्येन तस्य विद्वेषणेन च ।
पौरा न तस्य सत्कारङ् कृतवन्तो युधिष्ठिर ॥९॥
स तथा नगराभ्यासे सत्कारार्हो न सत्कृतः ।
त्रिरात्रम् उषितो राजा जलमात्रेण वर्तयन् ॥१०॥
पीड्यमानः क्षुधा तत्र फलमूलानि कर्षयन् ।
प्रातिष्ठत ततो राजा दमयन्ती तम् अन्वगात् ॥११॥
क्षुधया पीड्यमानस् तु नलो बहुतिथे ऽहनि ।
अपश्यच् छकुनान् कांश्चिद् हिरण्यसदृशच्छदान् ॥१२॥

---

secuta est. I Is cum eâ foris simul tres-noctes Naischadhus habita-
8. vit. II Pushcarus vero, magne-rex! divulgavit in urbe: I «Cum Nalo
9. qui simul adstet, is eat in occisionem mei.» (i. e. *per me.*) II Ob
Pushcari vero sermonem, ejus odiumque, I cives non illius hospitium
10. fecerunt, Yudhishthire! II Ille ita in urbis-vicinitate, hospitio-dig-
nus, non hospitio acceptus, I tres-noctes moratus *est* rex, aquâ-solâ
11. vivens, II afflictus fame ibi, fructus-radices avellens. I Processit
12. deinde rex, Damayantia eum sequebatur. II Fame afflictus vero Na-
lus post multos dies I vidit aves aliquas auro-similibus-alis. II

स चिन्तयामास तदा निषधाधिपतिर् बली ।
अस्ति भक्ष्यो ममा ऽद्या ऽयं वसु चे ऽदम् भविष्यति ॥ १३ ॥
ततस् तान् परिधानेन वाससा स समावृणोत् ।
तस्य तद् वस्त्रम् आदाय सर्वे जग्मुर् विहायसा ॥ १४ ॥
उत्पतन्तः खगा वाक्यम् एतद् आहुस् ततो नलम् ।
दृष्ट्वा दिग्वाससम् भूमौ स्थितन् दीनम् अधोमुखम् ॥ १५ ॥
वयम् अक्षाः सुदुर्बुद्धे तव वासो जिहीर्षवः ।
आगता न हि नः प्रीतिः सवाससि गते त्वयि ॥ १६ ॥
तान् समीक्ष्य गतान् अक्षान् आत्मानञ् च विवाससम् ।
पुण्यश्लोकस् तदा राजन् दमयन्तीम् अथा ऽब्रवीत् ॥ १७ ॥
येषाम् प्रकोपाद् ऐश्वर्यात् प्रच्युतो ऽहम् अनिन्दिते ।
प्राणयात्रान् न विन्दे च दुःखितः क्षुधया ऽन्वितः ॥ १८ ॥

---

13. Is cogitavit tum Naischadhorum-regnator validus: I Est cibus mihi
14. hodie hic, gazaque haec erit. II Deinde illas interulâ veste is invol-
15. vit; I ejus hac veste captâ, omnes iverunt in aërem. II Evolantes
aves sermonem hunc dixerunt tum Nalo, I tuitae nudum in terrâ
16. stantem, miserum, demisso-ore: II Nos tali *sumus* perinsane, tuam
vestem capiendi cupidi I aggressi; non enim nobis gaudium, cum-
17. veste profecto te. II Hos tuitus profectos talos, se ipsumque exper-
tem-vestis, I Punyaslôcus tunc, rex! Damayantiae deinde dixit: II
18. Quorum irâ e dominio lapsus ego, non-spreta! I vitae-victum non

येषाङ् कृते न सत्कारम् अकुर्वन् मयि नैषधाः ।
त इमे शकुना भूत्वा वासो ऽप्य् अपहरन्ति मे ॥ १९ ॥
वैषम्यम् परमम् प्राप्तो दुःखितो गतचेतनः ।
भर्त्ता ते ऽहन् निबोधे दं वचनं हितम् आत्मनः ॥ २० ॥
एते गच्छन्ति बहवः पन्थानो दक्षिणापथम् ।
अवन्तीम् ऋक्षवन्तञ् च समतिक्रम्य पर्वतम् ॥ २१ ॥
एष विन्ध्यो महाशैलः पयोष्णी च समुद्रगा ।
आश्रमाश् च महर्षीणाम् बहुमूलफलान्विताः ॥ २२ ॥
एष पन्था विदर्भाणाम् असौ गच्छति कोशलान् ।
अतः परञ् च देशो ऽयन् दक्षिणे दक्षिणापथः ॥ २३ ॥
एतद् वाक्यन् नलो राजा दमयन्तीं समाहितः ।

---

19. invenioque, afflictus, fame affectus; ‖ quorum causâ non hospitium
fecerunt mihi Naischadhi; | Ii hi, aves facti, vestem etiam abri-
20. piunt meam. ‖ In difficultatem eximiam profectus, afflictus, expers-
mentis, | conjux tuus ego; cognosce hunc sermonem salutarem
21. tibi: ‖ Hae eunt multae viae ad meridionalem-plagam, | Avantiam
22. Ricschavantemque transgredientes montem. ‖ Hic Vindhyus magnus-
mons, Payôschnîaque ad mare-fluens; | sedes solitariaeque magno-
23. rum-sapientum multis-radicibus-fructibus-instructae; ‖ haec via
Vidarbhorum, illa it in Côsalos; | illinc ulteriusque regio illa, ad
24. meridiem, *est* meridionalis-plaga. ‖ Hunc sermonem Nalus rex

उवाचा ऽसकृद् आर्त्तो हि भैमीम् उद्दिश्य भारत ॥ २४ ॥
ततः सा बाष्पकलया वाचा दुःखेन कर्षिता ।
उवाच दमयन्ती तन् नैषधङ् करुणं वचः ॥ २५ ॥
उद्वेपते मे हृदयं सीदन्त्य् अङ्गानि सर्वशः ।
तव पार्थिव सङ्कल्पञ् चिन्तयन्त्याः पुनः पुनः ॥ २६ ॥
हृतराज्यं हृतद्रव्यं विवस्त्रङ् क्षुत्तृषान्वितम् ।
कथम् उत्सृज्य गच्छेयम् अहन् त्वान् निर्जने वने ॥ २७ ॥
श्रान्तस्य ते क्षुधार्त्तस्य चिन्तयानस्य तत् सुखम् ।
वने घोरे महाराज नाशयिष्याम्य् अहङ् क्लमम् ॥ २८ ॥
न च भार्यासमङ् किञ्चिद् विद्यते भिषजाम् मतम् ।
औषधं सर्वदुःखेषु सत्यम् एतद् ब्रवीमि ते ॥ २९ ॥

---

Damayantiae studiosus | dixit non-semel, moestus, Bhaimiae, inter
25. monstrandum, Bhârate! || Deinde illa, lacrymis-oppressâ voce, dolore-tracta, | dixit Damayantia ei Naischadho miserandum sermonem: ||
26. Tremit mei cor, tabescunt membra omnino, | tuum, rex! consilium co-
27. gitantis iterum iterum. || Privatum-regno, privatum-opibus, orbum-veste, fame-siti-affectum, | quomodo relinquens abeam ego te in vacuâ-
28. hominibus sylvâ? || Defessi tui, fame-afflicti, cogitantis illam volupta-
29. tem, | in sylvâ terribili, magne-rex! delebo ego lassitudinem. || Non enim uxori-aequale ullum existit a medicis aestimatum | medicamentum in omnibus-doloribus; veritatem hanc dico tibi. ||

नल उवाच

एवम् एतद् यथा ऽत्थ त्वन् दमयन्ति सुमध्यमे ।
ना ऽस्ति भार्यासमम् मित्रन् नरस्या ऽऽर्तस्य भेषजम् ॥ ३० ॥
न चा ऽहन् त्यक्तुकामस् त्वाङ् किमर्थम् भीरु शङ्कसे ।
त्यजेयम् अहम् आत्मानन् न त्वे ऽवन् त्वाम् अनिन्दिते ॥ ३१ ॥

दमयन्त्य् उवाच

यदि मान् त्वम् महाराज न विहातुम् इहे ऽच्छसि ।
तत् किमर्थं विदर्भाणाम् पन्थाः समुपदिश्यते ॥ ३२ ॥
अवैमि चा ऽहन् नृपते न तु मान् त्यक्तुम् अर्हसि ।
चेतसा त्व् अपकृष्टेन मान् त्यजेथा महीपते ॥ ३३ ॥
पन्थानं हि ममा ऽभीक्ष्णम् आख्यासि च नरोत्तम ।

---

Nalus dixit:

30. Ita hoc, sicut dixisti tu, Damayantia pulchro-medio-corpore! I non
31. est uxori-aequale amicum viri afflicti medicamentum. II Neque ego deserendi-cupidus te. Quamobrem, pavida! times? I Desererem ego me ipsum, non vero te, non-spreta! II

Damayantia dixit:

32. Si me tu, magne-rex! non deserere hic vis, I ideo quamobrem Vi-
33. darbhorum via monstratur? II Intelligo enim ego, rex! ne vero me deserere velis! I Cum mente sane detractâ me desereres, terrae-do-
34. mine! II Viam enim meam iterum iterumque indicas, virorum-excel-

अतो निमित्तं शोकम् मे वर्धयस्य् अमरोपम ॥ ३४ ॥
यदि चा 'यम् अभिप्रायस् तव ज्ञातीन् व्रजेद् इति ।
सहिताव् एव गच्छावो विदर्भान् यदि मन्यसे ॥ ३५ ॥
विदर्भराजस् तत्र त्वाम् पूजयिष्यति मानद ।
तेन त्वम् पूजितो राजन् सुखं वत्स्यसि नो गृहे ॥ ३६ ॥
॥ इति नलोपाख्याने नवमः सर्गः ॥ ९ ॥

नल उवाच

यथा राज्यन् तव पितुस् तथा मम न संशयः ।
न तु तत्र गमिष्यामि विषमस्थः कथञ्चन ॥ १ ॥

---

lentissime! I Hujus causâ moerorem meum amplificas, immortalibus-
35. similis! II Si vero hoc consilium tuum, «ad propinquos eat;» ita; I
36. conjuncti sane imus in Vidarbhos, si putas. II Vidarbhorum-rex ibi
te honorabit, honoris-dator! I ab eo tu honoratus, rex! laete habitabis in nostri domo. II

## LIBER DECIMUS.

Nalus dixit:

1. Sicut regnum tuo patri, ita mihi, non dubium; I non vero illuc ibo

कथं समृद्धो गत्वा ऽहन् तव हर्षविवर्धनः ।
परिच्युतो गमिष्यामि तव शोकविवर्धनः ॥ २ ॥
इति ब्रुवन् नलो राजा दमयन्तीम् पुनः पुनः ।
सान्त्वयामास कल्याणीं वाससो ऽर्धेन संवृताम् ॥ ३ ॥
ताव् एकवस्त्रसंवीताव् अटमानाव् इतस् ततः ।
क्षुत्पिपासापरिश्रान्तौ सभाङ् काञ्चिद् उपेयतुः ॥ ४ ॥
तां सभाम् उपसम्प्राप्य तदा स निषधाधिपः ।
वैदर्भ्या सहितो राजा निषसाद महीतले ॥ ५ ॥
स वै विवस्त्रो विकटो मलिनः पांशुगुण्ठितः ।
दमयन्त्या सह श्रान्तः सुष्वाप धरणीतले ॥ ६ ॥
दमयन्त्य् अपि कल्याणी निद्रया ऽपहृता ततः ।

---

2. in difficultate-stans ullo modo. ‖ Quomodo dives postquam ivi (il-
luc) ego, tui gaudii-amplificator, | miser ibo, tui moeroris-amplifi-
3. cator? ‖ Sic dicens Nalus rex Damayantiae iterum iterum, | solatus
4. est eximiam, vestis dimidio tectam. ‖ Ii unâ-veste-induti, vaden-
tes huc illuc, | fame-siti-fessi ad casam quampiam pervenerunt. ‖
5. Ad hanc casam postquam profecti erant, tum is Nischadhorum-reg-
nator, | cum Vaidarbhia conjunctus rex consedit in terrae-solo. ‖
6. Is expers-vestis, expers-tori graminei, lutulentus, pulvere-obductus, |
7. cum Damayantiâ, fessus obdormivit in terrae-solo. ‖ Damayantia

सहसा दुःखम् आसाद्य सुकुमारी तपस्विनी ॥ ७ ॥
सुप्तायान् दमयन्त्यान् तु नलो राजा विशाम् पते ।
शोकोन्मथितचित्तात्मा न स्म शेते यथा पुरा ॥ ८ ॥
स तद् राज्यापहरणं सुहृत्त्यागञ् च सर्वशः ।
वने च तम् परिध्वंसम् प्रेक्ष्य चिन्ताम् उपेयिवान् ॥ ९ ॥
किन् नु मे स्याद् इदङ् कृत्वा किन् नु मे स्याद् अकुर्वतः ।
किन् नु मे मरणं श्रेयः परित्यागो जनस्य वा ॥ १० ॥
माम् इयं ह्य् अनुरक्तै 'व दुःखम् आप्नोति मत्कृते ।
मद्विहीना त्व् इयङ् गच्छेत् कदाचित् स्वजनम् प्रति ॥ ११ ॥
मयि निःशंसयन् दुःखम् इयम् प्राप्स्यत्य् अनुव्रता ।
उत्सर्गे शंसयः स्यात् तु विन्दता 'पि सुखङ् क्वचित् ॥ १२ ॥

---

quoque eximia a somno capta (est) deinde I cito, dolorem aggressa,
8. tenera, pia. II Dormiente Damayantiâ vero, Nalus rex, Visorum do-
9. mine! I maestitiâ-quasso-animo, non dormiebat sicut antea. II Is illum
regni-raptum, amicorum-relictionemque omnino, I in sylvâque hanc
10. circumcursionem intuitus, cogitationem aggressus *est:* II Quidne mihi
sit hoc faciendo? quidne mihi sit non facientis? I utrumne mihi mors
11. melior, relictio hominumve? II Mihi haec enim devota certe dolorem
adipiscitur mei causâ, I me-privata vero haec *fieri potest ut* eat ali-
12. quando familiam versus. II Apud me expertem-dubii dolorem ea
adipiscetur *mihi* devota, I in relictione dubium sit vero; *fieri potest*

स विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।
उत्सर्गम् मन्यते श्रेयो दमयन्त्या नराधिपः ॥ १३ ॥
न चै 'षा तेजसा शक्या कैश्चिद् धर्षयितुम् पथि ।
यशस्विनी महाभागा मद्भक्ते 'यम् पतिव्रता ॥ १४ ॥
एवन् तस्य तदा बुद्धिर् दमयन्त्यान् न्यवर्तत ।
कलिना दुष्टभावेन दमयन्त्या विसर्जने ॥ १५ ॥
सो ऽवस्त्रताम् आत्मनश् च तस्याश् चा 'प्य् एकवस्त्रताम् ।
चिन्तयित्वा 'ध्यगाद् राजा वस्त्रार्धस्या 'वकर्तनम् ॥ १६ ॥
कथं वासो विकर्तेयन् न च बुध्येत मे प्रिया ।
विचिन्त्यै 'वन् नलो राजा सभाम् पर्यचरत् तदा ॥ १७ ॥
परिधावन्न् अथ नल इतश् चे 'तश् च भारत ।

13. *ut* inveniat etiam gaudium alicubi. ‖ Ille, postquam perpenderat multum consideraveratque iterum iterum, | relictionem putat melio-
14. rem Damayantiae hominum-regnator. ‖ «Non enim ea ob splendorem potest a quibuslibet opprimi in viâ, | gloriosa, perfortunata,
15. mihi-devota haec conjugi-dedita.» ‖ Sic illius tunc mens circa Damayantiam versabatur, | per Calem pravâ-indole, in Damayantiae
16. relictione. ‖ Iste vestis-defectum suique, illius vero unius-vestis-possessionem | postquam cogitaverat, adiit rex vestis-dimidii abscis-
17. sionem. ‖ «Quomodo vestem abscindam, neque sentiat mea amata?» |
18. postquam cogitaverat sic Nalus rex, casam circumiit tunc. ‖ Circum-

आससाद सभोद्देशे विकोशङ् खड्गम् उत्तमम् ॥१८॥
तेना ’र्धं वाससश् छित्त्वा निवस्य च परन्तपः ।
सुप्ताम् उत्सृज्य वैदर्भीम् प्राद्रवद् गतचेतनः ॥१९॥
ततो निवृत्तहृदयः पुनर् आगम्य तां सभाम् ।
दमयन्तीन् तदा दृष्ट्वा रुरोद निषधाधिपः ॥२०॥
यान् न वायुर् न चा ’दित्यः पुरा पश्यति मे प्रियाम् ।
से ’यम् अद्य सभामध्ये शेते भूमाव् अनाथवत् ॥२१॥
इयं वस्त्रावकर्तेन संवीता चारुहासिनी ।
उन्मत्ते ’व वरारोहा कथम् बुद्ध्वा भविष्यति ॥२२॥
कथम् एका सती भैमी मया विरहिता शुभा ।

---

currens autem Nalus hicque illicque, Bhârate! I accessit in casae-
19. regione ad vacuum-vaginâ gladium excellentissimum. II Eo dimi-
dium vestis postquam sciderat indueratque, hostium-vexator! I dor-
20. mientem relinquens Vaidarbhiam aufugit expers-mentis. II Deinde
reverso-corde rursus aggressus ad illam casam, I Damayantiam tunc
21. tuitus, flevit Nischadhorum-rex. II «Quam non ventus neque sol
ante videbat meam amatam, I ea haec nunc in casae-medio dormit
22. humi, tutore-carentis-instar. II Ea, vestis-abscissione affecta, pul-
chre-ridens, I amens quasi, venusta, quomodo experrecta erit? II
23. Quomodo sola versans Bhaimia, a me relicta, fausta, I ambulabit in

चरिष्यति वने घोरे मृगव्यालनिषेविते ॥ २३ ॥
आदित्या वसवो रुद्रा अश्विनौ समरुद्गणौ ।
रक्षन्तु त्वाम् महाभागे धर्मेण ऽसि समावृता ॥ २४ ॥
एवम् उक्त्वा प्रियाम् भार्यां रूपेणा ऽप्रतिमाम् भुवि ।
कलिना ऽपहृतज्ञानो नलः त्र् आतिष्ठद् उद्यतः ॥ २५ ॥
गत्वा गत्वा नलो राजा पुनर् एति सभाम् मुहुः ।
आकृष्यमाणः कलिना सौहृदेना ऽवकृष्यते ॥ २६ ॥
द्विधे ऽव हृदयन् तस्य दुःखितस्या ऽभवत् तदा ।
दोले ऽव मुहुर् आयाति याति चै ऽव सभाम् प्रति ॥ २७ ॥
अवकृष्टस् तु कलिना मोहितः प्राद्रवन् नलः ।
सुप्ताम् उत्सृज्य ताम् भार्यां विलप्य करुणाम् बहु ॥ २८ ॥

---

24. sylvâ terribili, a feris- *et* serpentibus-cultâ? ‖ Adityi, Vasues, Rudri, duo Asvini cum-Marutorum-turbâ, | custodiunto te, perfortu-
25. nata! virtute es tecta.» ‖ Sic fatus ad amatam uxorem formâ incomparabilem in terrâ, | a Cale abreptum-intellectum *habens* Nalus pro-
26. cessit festinans. ‖ Profectus, profectus Nalus rex rursus it ad casam
27. iterum iterumque; | protractus a Cale, amicitiâ retrahitur. ‖ Bipartitum veluti cor ejus, afflicti, erat tunc; | oscillum veluti iterum ite-
28. rumque procedit, ceditque etiam casam versus. ‖ Abstractus vero a Cale, amens aufugit Nalus, | dormientem relinquens illam uxorem,

नष्टात्मा कलिना स्पृष्टस् तत् तद् विगणयन् नृपः ।
जगामै 'कां वने शून्ये भार्याम् उत्सृज्य दुःखितः ॥ २९ ॥

॥ इति नलोपाख्याने दशमः सर्गः ॥ १० ॥

वृहदश्व उवाच

अपक्रान्ते नले राजन् दमयन्ती गतक्लमा ।
अबुध्यत वरारोहा सन्त्रस्ता विजने वने ॥ १ ॥
अपश्यमाना भर्तारं शोकदुःखसमन्विता ।
प्राक्रोशद् उच्चैः सन्त्रस्ता महाराजे 'ति नैषधम् ॥ २ ॥
हा नाथ हा महाराज हा स्वामिन् किञ् जहासि माम् ।

---

29. lamentans miserabiliter multum. ‖ Perditum-animum *habens*, a Cale tactus, illud illud considerans rex, | ivit, solam in sylvâ desertâ uxorem relinquens, afflictus. ‖

## LIBER UNDECIMUS.

Vrihadasvus dixit:

1. Profecto Nalo, rex! Damayantia expers-lassitudinis | experrecta est insigne-medium corpus *habens*, perterrita, in experte-hominum sylvâ. ‖
2. Non-videns conjugem, moerore-dolore-affecta, | acclamavit clarâ
3. voce perterrita, magne-rex! sic Naischadho, ‖ heus tutor! heus

हा हता 'स्मि विनष्टा 'स्मि भीता 'स्मि विजने वने ॥ ३ ॥
ननु नाम महाराज धर्मज्ञः सत्यवाग् असि ।
कथम् उक्त्वा तथा सत्यं सुप्ताम् उत्सृज्य माङ् गतः ॥ ४ ॥
कथम् उत्सृज्य गन्तासि दक्षाम् भार्याम् अनुव्रताम् ।
विशेषतो ऽनपकृते परेणा 'पकृते सति ॥ ५ ॥
शक्ष्यसे ता गिरः सत्याः कर्तुम् मयि नरेश्वर ।
यास् तेषां लोकपालानां सन्निधौ कथिताः पुरा ॥ ६ ॥
ना 'काले विहितो मृत्युर् मर्त्यानाम् पुरुषर्षभ ।
यत्र कान्ता त्वयो 'त्सृष्टा मुहूर्तम् अपि जीवति ॥ ७ ॥
पर्याप्तः परिहासो ऽयम् एतावत् पुरुषर्षभ ।

---

magne rex! heus domine! quid deseris me? I heu occisa sum!
4. perdita sum! timida sum in desertâ sylvâ! II Nonne nempe, magne
rex! officiorum-gnarus, veridicus es? I Quomodo, postquam dixisti,
5. «ita verum,» dormientem relinquens me profectus *es?* II Quomodo
relictâ ibis rectâ conjuge, deditâ, I praesertim non-offensione
6. *existente,* per alium offensione existente? II Potes illas loquelas
veras facere in me, hominum-domine! I quae illorum mundi-custo-
7. dum in praesentiâ dictae olim. — II Non in non-tempore constituta
*est* mors mortalium, hominum-princeps! I quia amata, a te relicta,
8. momentum solum vivit. — II Obtentus jocus hic *est,* attamen,
hominum-princeps! I timens ego, perdifficilis-oppressu! ostende

भीता ऽहम् अतिदुर्धर्ष दर्शया ऽऽत्मानम् ईश्वर ॥ ८ ॥
दृश्यसे दृश्यसे राजन् एष दृष्टो ऽसि नैषध ।
आवार्य गुल्मैर् आत्मानङ् किम् मान् न प्रतिभाषसे ॥ ९ ॥
नृशंस बत राजेन्द्र यन् माम् एव गताम् इह ।
विलपन्तीं समागम्य ना ऽऽश्वासयसि पार्थिव ॥ १० ॥
न शोचाम्य् अहम् आत्मानन् न चा ऽन्यद् अपि किञ्चन ।
कथन् तु भवितास्य् एक इति त्वान् नृप शोचिमि ॥ ११ ॥
कथन् तु राजंस् तृषितः क्षुधितः श्रमकर्षितः ।
सायाह्ने वृक्षमूलेषु माम् अपश्यन् भविष्यसि ॥ १२ ॥
ततः सा तीव्रशोकार्ता प्रदीप्ते ऽव च मन्युना ।
इतश् चे ऽतश् च रुदती पर्यधावत दुःखिता ॥ १३ ॥

---

9. te, domine! — ‖ Conspiceris! Conspiceris, rex! Is conspectus es, Naischadhe! | Cum circumdedisti fruticibus te, quid mihi non re-
10. spondes? ‖ Improbe! heu! regum-princeps! quod me sic profectam
11. huc, | lamentantem, congressus non solaris, rex. ‖ Non miseror ego me, neque aliud etiam quidquam; | quomodo vero eris solus? sic
12. te, rex! miseror. ‖ Quomodo, rex! sitiens, famelicus, lassitudine-captus, | vespere ad arborum-radices, me non-videns, eris? ‖
13. Deinde illa, aspero-moerore-afflicta, flagrans velutique sollicitu-
14. dine, | hicque illicque flens circumcurrebat moesta. ‖ Modo exsilit

मुहुर् उत्पतते बाला मुहुः पतति विह्वला ।
मुहुर् आलीयते भीता मुहुः क्रोशति रोदिति ॥ १४ ॥
अतीव शोकसन्तप्ता मुहुर् निःश्वस्य दुःखिता ।
उवाच भैमी निःश्वस्य रुदत्य् ऽथ पतिव्रता ॥ १५ ॥
यस्या ऽभिशापाद् दुःखार्तो दुःखं विन्दति नैषधः ।
तस्य भूतस्य नो दुःखाद् दुःखम् अप्य् अधिकम् भवेत् ॥ १६ ॥
अपापचेतसम् पापो य एवङ् कृतवान् नलम् ।
तस्माद् दुःखतरम् प्राप्य जीवत्व् असुखजीविकाम् ॥ १७ ॥
एवन् तु विलपन्ती सा राज्ञो भार्या महात्मनः ।
अन्वेषमाणा भर्तारं वने श्वापदसेविते ॥ १८ ॥
उन्मत्तवद् भीमसुता विलपन्ती ततस् ततः ।

---

puella, modo cadit perturbata, | modo tabescit timida, modo clamat,
15. flet. || Maxime moerore-usta, postquam iterum iterumque suspira-
verat afflicta, | dixit Bhaimia cum gemitu flens tum conjugi-de-
16. dita: || Per cujus exsecrationem dolore-afflictus dolorem invenit
Naischadhus, | huic animanti nostro dolore dolor quoque superior
17. sit. || Non-pravâ-mente *praeditum* pravus qui sic reddidit Nalum, |
18. quam hoc dolorosius nactus, vivito carentem-gaudio vitam. || Sic
vero lamentans illa regis conjux magnanimi, | quaerens conjugem in
19. sylvâ a feris-cultâ, || amentis-instar Bhimi-filia, lamentans iterum

हा हा राजन् इति मुहुर् इतश् चे ऽतश् च धावति ॥ १९ ॥
ताङ् क्रन्दमानाम् अत्यर्थङ् कुररीम् इव वाशतीम् ।
करुणम् बहु शोचन्तीं विलपन्तीम् मुहुर् मुहुः ॥ २० ॥
सहसा ऽभ्यागताम् भैमीम् अभ्यासपरिवर्तिनीम् ।
जग्राह ऽजगरो ग्राहो महाकायः क्षुधान्वितः ॥ २१ ॥
सा ग्रस्यमाना ग्राहेण शोकेन च परिप्लुता ।
ना ऽऽत्मानं शोचति तथा यथा शोचति नैषधम् ॥ २२ ॥
हा नाथ माम् इह वने ग्रस्यमानाम् अनाथवत् ।
ग्राहेणा ऽनेन विजने किमर्थन् ना ऽनुधावसि ॥ २३ ॥
कथम् भविष्यसि पुनर् माम् अनुस्मृत्य नैषध ।
शापान् मुक्तः पुनर् लब्ध्वा बुद्धिञ् चेतो धनानि च ॥ २४ ॥

---

iterumque, | «heu! heu! rex!» sic *exclamans* iterum iterumque, huc-
20. que illucque currit. || Eam flentem supra-modum, haliaeetum veluti
ululantem, | miserabiliter multum querentem, lamentantem iterum
21. iterum, || subito aggressam Bhaimiam, in propinquitate-circumeun-
22. tem, | cepit serpens magno-corpore, fame-affectus. || Ea dum ca-
pitur a serpente, moeroreque circumfusa, | non se ipsam miseratur
23. ita, sicut miseratur Naischadhum: || «O tutor! ad me hic in sylvâ
captam, tutore-carentem-veluti, | a serpente hoc in desertâ, quam-
24. obrem non accurris? || Quomodo eris, rursus me postquam recor-
datus fueris, Naischadhe? | exsecratione solutus, rursus adeptus in-

श्रान्तस्य ते क्षुधार्तस्य परिग्लानस्य नैषध ।
कः श्रमं राजशार्दूल नाशयिष्यति ते ऽनघ ॥ २५ ॥
ततः कश्चिन् मृगव्याधो विचरन् गहने वने ।
आक्रन्दमानां संश्रुत्य जवेना ऽभिससार ह ॥ २६ ॥
तान् तु दृष्ट्वा तथा ग्रस्ताम् उरगेणा ऽऽयतेक्षणाम् ।
त्वरमाणो मृगव्याधः समभिक्रम्य वेगतः ॥ २७ ॥
मुखतः पाटयामास शस्त्रेण विशितेन च ।
निर्विचेष्टम् भुजगन् तं विशस्य मृगजीवनः ॥ २८ ॥
मोक्षयित्वा स तां व्याधः प्रक्षाल्य सलिलेन च ।
समाश्वास्य कृताहाराम् अथ पप्रच्छ भारत ॥ २९ ॥
कस्य त्वम् मृगशावाक्षि कथञ् चा ऽभ्यागता वनम् ।

---

25. tellectum, mentem, divitiasque? ॥ Fesso tibi, fame-afflicto, languore confecto, Naischadhe! । quis lassitudinem, regum-princeps! delebit
26. tibi, expers-peccatorum? ॥ Deinde quispiam venator, ambulans in densâ sylvâ, । flentem postquam audiverat, cum velocitate advenit. ॥
27. Eamque tuitus ita captam a serpente longis-oculis *praeditam,* । festi-
28. nans venator, aggressus velociter, ॥ in conspectu perforavit sagittâ acutâ । non-renitentem serpentem illum. Occidendo feris-
29. vivens ॥ postquam solverat hic illam venator, abluerat aquâque, ।
30. consolatus instructam-cibo, tum interrogavit, o Bhârate: ॥ Cujus *es*

कथञ् चे ऽदम् महत् कृच्छ्रम् प्राप्तवत्य् असि भाविनि ॥३०॥
दमयन्ती तथा तेन पृच्छ्यमाना विशाम् पते ।
सर्वम् एतद् यथावृत्तम् आचचक्षे ऽस्य भारत ॥३१॥
ताम् अर्धवस्त्रसंवीताम् पीनश्रोणिपयोधराम् ।
सुकुमारानवद्याङ्गीम् पूर्णचन्द्रनिभाननाम् ॥३२॥
अरालपक्ष्मनयनान् तथा मधुरभाषिणीम् ।
लक्षयित्वा मृगव्याधः कामस्य वशम् ईयिवान् ॥३३॥
ताम् एवं श्लक्ष्णया वाचा लुब्धको मृदुपूर्वया ।
सान्त्वयामास कामार्तस् तद् अबुध्यत भाविनी ॥३४॥
दमयन्त्य् अपि तन् दुष्टम् उपलभ्य पतिव्रता ।
तीव्ररोषसमाविष्टा प्रजज्वाले ऽव मन्युना ॥३५॥

---

tu, dorcadis-vituli-oculis *praedita!* quomodoque aggressa sylvam? |
31. quomodoque ad hanc magnam miseriam profecta es, egregia? ‖ Damayantia sic ab illo interrogata, Visorum domine! | omne illud sicut-
32. factum enarravit ei, Bhârate! ‖ Eam dimidiâ-veste-indutam, turgidis-femoribus-*et* mammis *praeditam,* | teneris-pulchris-membris,
33. plenae-lunae-simili-vultu, ‖ curvis-ciliis-*praeditos* oculos *habentem,* tam dulce-loquentem, | tuitus venator, in amoris-potestatem
34. profectus *est.* ‖ Eam itaque leni voce venator suaviter-incipiente |
35. solatus est amore-afflictus; hoc intellexit egregia. ‖ Damayantia vero, hunc improbum postquam comprehenderat, conjugi-devota, | acri-

स तु पापमतिः क्षुद्रः प्रधर्षयितुम् आतुरः ।
दुर्धर्षान् तर्कयामास दीप्ताम् अग्निशिखाम् इव ॥ ३६ ॥
दमयन्ती तु दुःखार्ता पतिराज्यविनाकृता ।
अतीतवाक्पथे काले शशापैनं रुषान्विता ॥ ३७ ॥
यथा ऽहन् नैषधाद् अन्यम् मनसा ऽपि न चिन्तये ।
तथा ऽयम् पतताद् क्षुद्रः परासुर् मृगजीवनः ॥ ३८ ॥
उक्तमात्रे तु वचने तथा स मृगजीवनः ।
व्यसुः पपात मेदिन्याम् अग्निदग्ध इव द्रुमः ॥ ३९ ॥

॥ इति नलोपाख्यान एकादशः सर्गः ॥ ११ ॥

---

36. irâ - capta flagrabat quasi indignatione. ॥ Ille vero pravam - mentem
*habens*, vilis, opprimendi impotens, । difficilem - oppressu considera-
37. vit, fulgentem ignis - flammae instar. ॥ Damayantia vero dolore - af-
flicta, conjuge - regno - orbata, । praeterito - loquelae - convenientc
38. tempore, exsecrata est illum irâ - affecta: ॥ «Sicut ego Naischadho
alium mente quoque non cogito, । ita hic cadito vilis inanimis ve-
39. nator.» ॥ Dicto soloque sermone, ita ille venator । inanimis cecidit
in terrâ igne - combusta veluti arbor. ॥

वृहदश्व उवाच

सा निहत्य मृगव्याधम् प्रतस्थे कमलेक्षणा ।
वनम् प्रतिभयं शून्यञ् झिल्लिकागणनादितम् ॥ १ ॥
सिंहद्वीपिरुरुव्याघ्रमहिषर्क्षगणैर् युतम् ।
नानापक्षिगणाकीर्णाम् म्लेछतस्करसेवितम् ॥ २ ॥
शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः ।
अर्जुनारिष्टसञ्छन्नं स्यन्दनैश् च सशाल्मलैः ॥ ३ ॥
जम्ब्वाम्रलोध्रखदिरसालवेत्रसमाकुलम् ।
पद्मकामलकप्लक्षकदम्बोदुम्बरावृतम् ॥ ४ ॥
वदरीविल्वसञ्छन्नन् न्यग्रोधैश् च समाकुलम् ।

---

## LIBER DUODECIMUS.

Vrihadasvus dixit:

1. Illa, postquam occiderat ferarum-venatorem, processit loto (similibus)-oculis *praedita* I in sylvam terribilem, desertam, a gryllorum-
2. turbis-personitam, II leonum-pardorum-*ruruum*-tigrium-bubalorum-ursorum-turbis instructam, I variarum-avium-turbis-plenam,
3. a Mlêtschis-*et* furibus-cultam, II *sâlis-vênibus-dhavis-asvatthis-tingudis-ingudis-cinsucis,* I *ardschunis-ârischtis*-tectam, *syandanis-*
4. que cum-*sâlmacis,* II *dschambîbus-âmris-lôdhris-khadiris-sâlis-vêtris*-plenam, I *padmacis-âmulacis-placschis-cadambis-udumbaris-*
5. instructam, II *vadariis-vilvis*-tectam, *nyagrôdhis*que-plenam, I *pri-*

प्रियालतालखर्जूरहरीतकीविभीतकैः ॥ ५ ॥
नानाधातुशतैर् नद्धान् विविधान् अपि चा ऽचलान् ।
निकुञ्जान् परिसङ्घुष्टान् दरीश् चा ऽद्भुतदर्शनाः ॥ ६ ॥
नदीः सरांसि वापीश् च विविधांश् च मृगद्विजान् ।
सा बहून् भीमरूपांश् च पिशाचोरगराक्षसान् ॥ ७ ॥
पल्वलानि तडागानि गिरिकूटानि सर्वशः ।
सरितो निर्झरांश् चै ऽव ददर्शा ऽद्भुतदर्शनान् ॥ ८ ॥
यूथशो ददृशे चा ऽत्र विदर्भाधिपनन्दिनी ।
महिषांश् च वराहांश् च ऋक्षांश् च वनपन्नगान् ॥ ९ ॥
तेजसा यशसा लक्ष्म्या स्थित्या च परया युता ।
वैदर्भी विचरत्य् एका नलम् अन्वेषती तदा ॥ १० ॥

---

6. *yâlis - tâlis - khardschûris - harîtacibus - vibhîtacis.* ‖ Variorum - metallorum - centenis instructos varios etiamque montes, | virgulta circumsonita, specusque miros - visu, ‖
7. amnes, stagna, lacusque, variasque feras-*et* aves, | illa, multos terribili - formâque Pisâtschos - serpentes - Râcschasos, ‖
8. paludes, piscinas, montium - cacumina omnino, | flumina, catarractasque, videbat, miras - visu; ‖
9. gregatim videbatque ibi Vidarbhorum - regnatoris - filia | bubalosque, aprosque, ursosque *et* sylvae - serpentes. ‖
10. Splendori, gloriae, felicitati, constantiaeque eximiae juncta | Vaidarbhia, ambulans sola, Nalum quaerens tunc, ‖

ना ऽबिभ्यत् सा नृपसुता भैमी तत्रा ऽथ कस्यचित् ।
दारुणाम् अटवीम् प्राप्य भर्तृव्यसनपीडिता ॥ ११ ॥
विदर्भतनया राजन् विललाप सुदुःखिता ।
भर्तृशोकपरीताङ्गी शिलातलम् अथा ऽश्रिता ॥ १२ ॥
व्यूढोरस्क महाबाहो नैषधानाम् जनाधिप ।
क्व नु राजन् गतो ऽसी ऽह त्यक्त्वा मां विजने वने ॥ १३ ॥
अश्वमेधादिभिर् वीर क्रतुभिर् भूरिदक्षिणैः ।
कथम् इष्ट्वा नरव्याघ्र मयि मिथ्या प्रवर्तसे ॥ १४ ॥
यत् त्वयो ऽक्तम् नरश्रेष्ठ मत्समक्षम् महाद्युते ।
स्मर्तुम् अर्हसि कल्याण वचनम् पार्थिवर्षभ ॥ १५ ॥
यच् चो ऽक्तं विहगैर् हंसैः समीपे तव भूमिप ।

---

11. non timebat ea regis-filia Bhaimia ibi a quoquam. I In horribilem
12. sylvam profecta, conjugis-calamitate-vexata, II Vidarbhorum-filia, rex! lamentabatur perafflicta, I de conjuge-moerore-affectis-mem-
13. bris, ad rupis-superficiem tum aggressa: II Solido-pectore, magnis-brachiis, Nischadhorum regnator! I quone, rex! profectus es, hic
14. relictâ me in desertâ sylvâ? II Asvamèdho-et aliis, heros! sacrificiis multa-dona sacrificalia *habentibus*, I quomodo, postquam sacrificasti,
15. virorum-princeps! in me fallaciter agis? II Qui a te dictus, virorum-optime, in meo conspectu, magno-splendore *praedite*, I recordari
16. velis, eximie! sermonem, regum-princeps! II Et quod dictum a vo-

मत्समक्षं यद् उक्तञ् च तद् अवेक्षितुम् अर्हसि ॥१६॥
चत्वार एकतो वेदाः साङ्गोपाङ्गाः सविस्तराः ।
स्वधीता मनुजव्याघ्र सत्यम् एकङ् किलै 'कतः ॥१७॥
तस्माद् अर्हसि शत्रुघ्न सत्यङ् कर्तुन् नरेश्वर ।
उक्तवान् असि यद् वीर मत्सकाशे पुरा वचः ॥१८॥
हा वीर ननु नामा 'हम् इष्टा किल तवा 'नघ ।
अस्याम् अटव्याङ् घोरायाङ् किम् मान् न प्रतिभाषसे ॥१९॥
भक्षयत्य् एष मां रौद्रो व्यात्तास्यो दारुणाकृतिः ।
अरण्यराट् क्षुधाविष्टः किम् मान् न त्रातुम् अर्हसि ॥२०॥
न मे त्वद् अन्या काचिद् धि प्रिया 'स्ती 'त्य् अब्रवीः सदा ।
ताम् ऋताङ् कुरु कल्याण पुरो 'क्ताम् भारतीन् नृप ॥२१॥

---

lucribus anseribus in propinquitate tuâ, terrae-regnator! I in meo
17. conspectu quod dictumque, hoc respicere velis. II Quatuor unice
*Vêdi* cum-*Angis-et Upângis*, extensi, I bene-perlecti, hominum-
18. princeps! veritas *est* una profecto unice. II Ideo velis, hostium-occisor!
verum facere, hominum domine, I fatus es quem, heros! in meâ-
19. praesentiâ olim sermonem. II O heros! nonne nempe ego amata pro-
fecto tua, pure-a peccatis? I In hac sylvâ terribili quid mihi non
20. respondes? — II Devorat hic me atrox, diducto-ore, horrendâ-for-
21. mâ I sylvae-rex fame-captus; quid me non servare vis? II «Non mihi
te alia quaequam cara est;» sic dixisti semper, I hanc veram fac, exi-

उन्मत्तां विलपन्तीम् माम् भार्याम् इष्टान् नराधिप ।
ईप्सिताम् ईप्सितो नाथ किम् मान् न प्रतिभाषसे ॥ २२ ॥
कृशान् दीनां विवर्णाञ् च मलिनां वसुधाधिप ।
वस्त्रार्धप्रावृताम् एकां विलपन्तीम् अनाथवत् ॥ २३ ॥
यूथभ्रष्टाम् इवै 'काम् मां हरिणीम् पृथुलोचनाम् ।
न मानयसि माम् आर्य रुदतीम् अरिकर्षण ॥ २४ ॥
महाराज महारण्ये अहम् एकाकिनी सती ।
दमयन्त्य् अभिभाषे त्वाङ् किम् मान् न प्रतिभाषसे ॥ २५ ॥
कुलशीलोपसम्पन्न चारुसर्वाङ्गदर्शन ।
ना 'द्य त्वाम् प्रतिपश्यामि गिराव् अस्मिन् नरोत्तम ॥ २६ ॥
वने चा 'स्मिन् महाघोरे सिंहव्याघ्रनिषेविते ।

---

22. mie! olim dictam loquelam, rex! ‖ Dementi, lamentanti mihi, uxori amatae, hominum-regnator! | desideratae desideratus, tutor! quid mihi
23. non respondes? ‖ Macram, miseram, pallidamque, lutulentam, terrae-regnator! | vestis-dimidio-indutam, solam, lamentantem tutore-ca-
24. rentis-instar, ‖ a grege-separatam veluti solam, me, cervam magnis-oculis, | non honoras me, venerande! flentem, hostium-vexator! ‖
25. Magne-rex, in magnâ-sylvâ ego unica versans | Damayantia alloquor
26. te; quid mihi non respondes? ‖ Genere *nobili*-bonâ indole-praedite, *cum* pulchro-omnium membrorum-aspectu, | nonne hodie te video
27. in monte hoc, virorum-excellentissime? ‖ in sylvâque hac perterri-

शयानम् उपविष्टं वा स्थितं वा निषधाधिप ॥२७॥
प्रस्थितं वा नरश्रेष्ठ मम शोकविवर्धन ।
कन् नु पृच्छामि दुःखार्ता त्वदर्थे शोककर्शिता ॥२८॥
कच्चिद् दृष्टस् त्वया ऽरण्ये सङ्गत्ये ऽह नलो नृपः ।
को नु मे कथयेद् अद्य वने ऽस्मिन् विष्ठितन् नृपम् ॥२९॥
अभिरूपम् महात्मानम् परव्यूहविनाशनम् ।
यम् अन्वेषसि राजानन् नलम् पद्मनिभेक्षणम् ॥३०॥
अयं स इति कस्या ऽद्य श्रोष्यामि मधुराङ् गिरम् ।
अरण्यराड् अयं श्रीमांश् चतुर्दंष्ट्रो महाहनुः ॥३१॥
शार्दूलो ऽभिमुखो ऽभ्येति व्रजाम्य् एनम् अशङ्किता ।
भवान् मृगाणाम् अधिपस् त्वम् अस्मिन् कानने प्रभुः ॥३२॥

---

ribili, a leonibus-tigribus-cultâ, I iacentem, sedentemve, stantemve,
28. Nischadhorum-regnator! II procedentemve, virorum-optime! mei
moeroris-amplificator? I Quemne interrogem dolor[illegible] afflicta tui-
29. causâ moerore-attenuata: II «An visus a te in sylvâ fortuito hic
Nalus rex?» — I Quisne mihi indicabit hodie in sylvâ hac versan-
30. tem regem II formosum, magnanimum, hostium-turbae-destructo-
31. rem? I «Quem quaeris regem Nalum loto-similibus-oculis, II hic iste;»
sic cujus hodie audiam dulcem vocem? — I Sylvae-rex hic, felix,
32. quatuor-dentibus, magnis-maxillis, II tigris adverso-ore advenit,
accedo ad eum non-pavens. I «Tu *es* ferarum rex, tu in hac sylvâ

विदर्भराजतनयान् दमयन्ती ’ति विद्धि माम् ।
निषधाधिपतेर् भार्यान् नलस्या ’मित्रघातिनः ॥ ३३ ॥
पतिम् अन्वेषतीम् एकाङ् कृपणां शोककर्षिताम् ।
आश्वासय मृगेन्द्रे ’ह यदि दृष्टस् त्वया नलः ॥ ३४ ॥
अथवा ’रण्यनृपते नलं यदि न शंससि ।
माङ् खादय मृगश्रेष्ठ दुःखाद् अस्माद् विमोचय ॥ ३५ ॥
श्रुत्वा ’रण्ये विलपितम् ममै ’ष मृगराट् स्वयम् ।
यात्य् एताम् मृष्टसलिलाम् आपगां सागरङ्गमाम् ॥ ३६ ॥
इमं शिलोच्चयम् पुण्यं शृङ्गैर् बहुभिर् उच्छ्रितैः ।
विराजद्भिर् दिविस्पृग्भिर् नैकवर्णैर् मनोहरैः ॥ ३७ ॥
नानाधातुसमाकीर्णं विविधोपलभूषितम् ।

---

33. dominus; ‖ Vidarbhorum-regis-filiam, «Damayantia», sic scito me, ǀ
34. Nischadhorum-regis uxorem, Nali, inimicorum-occisoris, ‖ conju-
gem quaerentem, solam, miserandam, moerore-tractam. ǀ Consolare
35. *me*, ferarum-rex! hic si visus a te Nalus; ‖ aut, sylvae-domine! Na-
lum si non indicas, ǀ me devora, ferarum-optime! moerore hoc
36. solve.» ‖ Audito in sylvâ lamento meo, hic ferarum-rex ipse ǀ it
37. ad hunc clarâ-lymphâ amnem ad mare-fluentem. ‖ Hunc montem
purum cacuminibus multis erectis, ǀ splendentibus, coelum-tangen-
38. tibus, multicoloribus, cor-rapientibus, ‖ variorum-metallorum-ple-

अस्या ऽरण्यस्य महतः केतुभूतम् इवो ऽत्थितम् ॥३८॥
सिंहशार्दूलमातङ्गवराहर्क्षमृगायुतम् ।
पतत्रिभिर् बहुविधैः समन्ताद् अनुनादितम् ॥३९॥
किंशुकाशोकवकुलपुन्नागैर् उपशोभितम् ।
कर्णिकारधवप्लक्षैः सुपुष्पैर् उपशोभितम् ॥४०॥
सरिद्भिः सविहङ्गाभिः शिखरैश् च समाकुलम् ।
गिरिराजम् इमन् तावत् प्रक्ष्यामि नृपतिम् प्रति ॥४१॥
भगवन् अचलश्रेष्ठ दिव्यदर्शनविश्रुत ।
शरण्य बहुकल्याण नमस् ते ऽस्तु महीधर ॥४२॥
प्रणमे त्वा ऽभिगम्या ऽहं राजपुत्रीन् निबोध माम् ।
राज्ञः स्नुषां राजभार्यान् दमयन्ती ऽति विश्रुताम् ॥४३॥

---

num, variis-gemmis-ornatum, | hujus sylvae magnae vexillum-existens
39. quasi erectum, || leonibus-tigribus-elephantis-apris-ursis-dorcadibus-
40. instructum, | ab avibus multigenis undique personitum, || *cinsucis-*
*asôcis-vaculis-punnâgis* exornatum, | *carnicâris-dhavis-placschis*
41. pulchros-flores *habentibus* exornatum, || fluviorum cum-volucribus,
cacuminumque plenum: | montium-regem hunc nunc interrogabo
42. de hominum-domino: || Excellens, montium-optime, coelesti-aspectu-
celebrate, | refugium praebens, multum-praeclare, salutatio tibi
43. esto, mons! || saluto te aggressa ego; regis-filiam nosce me, | re-
44. gis nurum, regis-uxorem, «Damayantia,» sic celebratam. || Vidar-

विदर्भराजा 'धिपतिः पिता मम महारथः ।
भीमो नाम क्षितिपतिश् चातुर्वर्ण्यस्य रक्षिता ॥ ४४ ॥
राजसूयाश्वमेधानाङ् क्रतूनान् दक्षिणावताम् ।
आहर्ता पार्थिवश्रेष्ठः पृथुचार्वञ्चितेक्षणः ॥ ४५ ॥
ब्रह्मण्यः साधुवृत्तश् च सत्यवाग् अनसूयकः ।
शीलवान् वीर्यसम्पन्नः पृथुश्रीर् धर्मविच् छुचिः ॥ ४६ ॥
सम्यग् गोप्ता विदर्भानान् निर्जितारिगणः प्रभुः ।
तस्य मां विद्धि तनयाम् भगवंस् त्वाम् उपास्थिताम् ॥ ४७ ॥
निषधेषु महाशैल श्वशुरो मे नरोत्तमः ।
गृहीतनामा विख्यातो वीरसेन इति स्म ह ॥ ४८ ॥
तस्य राज्ञः सुतो वीरः श्रीमान् सत्यपराक्रमः ।

---

bhorum-rex regnator pater meus, magnus-heros, | Bhîmus nomine,
45. terrae-dominus, quatuor-tribuum servator, || Râdschasûyorum-As-
vamêdhorum sacrificiorum donis sacrificalibus praeditorum | appa-
46. rator, regum-optimus, magnis-pulchris-veneratis-oculis, || religio-
sus, bonâ-vitâque, veridicus, non-maledicus, | bonâ indole, fortitu-
47. dine-praeditus, magnâ-felicitate, officiorum-gnarus, purus, || omnino
custos Vidarbhorum, victam-hostium-turbam *habens* dominus; | hujus
48. me scito filiam, excellens! te aggressam. || In Nischadhis, magne-
mons! socer meus virorum-excellentissimus, | captum-nomen *ha-*
49. *bens*, celebratus, Vîrasênus, sic *nominatus;* || hujus regis filius, he-

क्रमप्राप्तम् पितुः स्वं यो राज्यं समनुशास्ति ह ॥ ४९ ॥
नलो नामा 'रिहा श्यामः पुण्यश्लोक इति श्रुतः ।
ब्रह्मण्यो वेदविद् वाग्मी पुण्यकृत् सोमपो ऽग्निमान् ॥ ५० ॥
यष्टा दाता च योद्धा च सम्यक् चै 'व प्रशासिता ।
तस्य माम् अचलश्रेष्ठ विद्धि भार्याम् इहा "गताम् ॥ ५१ ॥
त्यक्तश्रियम् भर्तृहीनाम् अनाथां व्यसनान्विताम् ।
अन्वेषमाणाम् भर्तारन् तं वै नरवरोत्तमम् ॥ ५२ ॥
खम् उल्लिखद्भिर् एतैर् हि त्वया शृङ्गशतैर् नृपः ।
कच्चिद् दृष्टो ऽचलश्रेष्ठ वने ऽस्मिन् दारुणे नलः ॥ ५३ ॥
गजेन्द्रविक्रमो धीमान् दीर्घबाहुर् अमर्षणः ।

---

ros, felix, vere-fortis, | successione-impetratum patris suum qui re-
50. gnum regit, || Nalus nomine, hostium-occisor, niger, Punyaslôcus,
sic auditus, | religiosus, *Vêdorum*-gnarus, facundus, pura-agens, as-
51. clepiadis acidae *succum*-bibens, ignis studiosus; || sacrificator, dator-
que, pugnatorque, omninoque etiam regnator; | hujus me, montium-
52. optime! scito uxorem, huc aggressam, || relictâ-felicitate, conjuge-
privatam, carentem-tutore, calamitate-affectam, | quaerentem con-
53. jugem, illum nempe virorum-egregiorum-excellentissimum. || In
aërem *se* erigentibus his a te cacuminum-centenis rex | an visus,
54. montium-optime! in sylvâ hac terribili Nalus? || Elephantorum-
principis-fortitudine *praeditus*, sapiens, longis-brachiis, vehemens, |

विक्रान्तः सत्यवाग् वीरो भर्ता मम महायशाः ॥५४॥
निषधानाम् अधिपतिः कच्चिद् दृष्टस् त्वया नलः ।
किम् मां विलपतीम् एकाम् पर्वतश्रेष्ठ विह्वलाम् ॥५५॥
गिरा ना "श्वासयस्य् अद्य स्वां सुताम् इव दुःखिताम् ।
वीर विक्रान्त धर्मज्ञ सत्यसन्ध महीपते ॥५६॥
यद्य् अस्य् अस्मिन् वने राजन् दर्शया "त्मानम् आत्मना ।
कदा सुस्निग्धगम्भीराञ् जीमूतस्वनसन्निभाम् ॥५७॥
श्रोष्यामि नैषधस्या 'हं वाचन् ताम् अमृतोपमाम् ।
वैदर्भी 'त्य् एव विस्पष्टां शुभां राज्ञो महात्मनः ॥५८॥
आम्नायसारिणीम् ऋद्धीम् मम शोकविनाशिनीम् ।
भीताम् आश्वासय माञ् च नृपते धर्मवत्सल ॥५९॥

---

55. fortis, veridicus, heros, conjux meus magnâ-gloriâ, ‖ Nischadhorum
regnator an visus a te Nalus? | Quid me querentem, solam, montium-
56. optime! conturbatam ‖ voce non consolaris nunc, tuam filiam veluti
afflictam? — | Heros (Nale), fortis, officiorum-gnare, vera-promissa
57. *habens*, terrae-domine! ‖ si es in hac sylvâ, rex! ostende te per te! |
58. Quando persuaviter-profundam, nubis-sono-similem ‖ audiam Nai-
schadhi ego vocem illam *amrito*-parem, | «Vaidarbhia!» sic nempe
59. manifestam, faustam, regis magnanimi, ‖ *Vêdorum*-essentiâ praeditam,
uberem, mei moeroris-deletricem? — | Timidam consolare me,
60. rex! virtutis-amice! ‖ Sic illa ad illum montium-optimum fata

इति सा तं गिरिश्रेष्ठम् उक्त्वा पार्थिवनन्दिनी ।
दमयन्ती ततो भूयो जगाम दिशम् उत्तराम् ॥ ६० ॥
सा गत्वा त्रीन् अहोरात्रान् ददर्श परमाङ्गना ।
तापसारण्यम् अतुलन् दिव्यकाननदर्शनम् ॥ ६१ ॥
वशिष्ठभृग्वत्रिसमैस् तापसैर् उपशोभितम् ।
नियतैः संयताहारैर् दमशौचसमन्वितैः ॥ ६२ ॥
अब्भक्षैर् वायुभक्षैश् च पत्त्राहारैस् तथै व च ।
जितेन्द्रियैर् महाभागैः स्वर्गमार्गदिदृक्षुभिः ॥ ६३ ॥
वल्कलाजिनसंवीतैर् मुनिभिः संयतेन्द्रियैः ।
तापसाध्युषितं रम्यन् ददर्शा ऽश्रममण्डलम् ॥ ६४ ॥
नानामृगगणैर् जुष्टं शाखामृगगणायुतम् ।

---

regis-filia, | Damayantia tum plus ivit plagam septentrionalem ver-
61. sus. || Ea, postquam iverat tres dies-*et* noctes, vidit eximia-femina |
anachoretarum-sylvam incomparabilem coelestis-luci-aspectu *prae-*
62. *ditam* || Vasischtho-Bhrigui-Atri-paribus anachoretis ornatum, |
63. cohibitis, cohibito-victu, temperantiâ-puritate-praeditis, || aquâ-
vescentibus, vento-vescentibusque, folia-*tanquam* cibum *habentibus*
ita etiamque, | oppressos-sensus *habentibus*, perfortunatis, coeli-
64. viam-videndi cupidis, || vestibus e libro confectis-*et* pellibus-indutis
anachoretis cohibitis-sensibus; | ab anachoretis-habitatum amoenum
65. vidit sedium solitariarum-orbem, || a variarum-ferarum-turbis cul-

तापसैः समुपेतञ् च सा दृष्ट्वै 'व समाश्वसत् ॥ ६५ ॥
सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।
वर्चस्विनी सुप्रतिष्ठा स्वसितायतलोचना ॥ ६६ ॥
सा विवेशा ''श्रमपदं वीरसेनसुतप्रिया ।
योषिद्रत्नम् महाभागा दमयन्ती तपस्विनी ॥ ६७ ॥
सा 'भिवाद्य तपोवृद्धान् विनयावनता स्थिता ।
स्वागतन् त इति प्रोक्ता तैः सर्वैस् तापसैश् च सा ॥ ६८ ॥
पूजाञ् चा 'स्या यथान्यायङ् कृत्वा तत्र तपोधनाः ।
आस्यताम् इत्य् अथो ''चुस् ते ब्रूहि किङ् करवामहे ॥ ६९ ॥
तान् उवाच वरारोहा कच्चिद् भगवताम् इह ।

---

tum, simiarum-turbis-instructum, | ab anachoretis visitatumque. Illa,
66. postquam viderat nempe, respiravit. || Pulchris-superciliis *praedita*,
pulchris-comis, pulchris-femoribus, pulchris-mammis, pulchros-
dentes *habente* ore, | splendens, percelebris, pulchris-nigris-longis-
67. oculis *praedita*, || illa intravit sedium solitariarum-locum Vîraséni-
filii-amata, | feminarum-margarita, perfortunata, Damayantia pia. ||
68. Ea, inclinato corpore postquam salutaverat devotionis-divites, cum
modestiâ-inclinata stabat. | «Salutatio tibi!» sic compellata *est* ab
69. illis cunctis anachoretis ea; || honorationemque ejus sicut-convenientia
postquam fecerant ibi devotionis-divites, | «Sedeatur,» sic tum dixe-
70. runt illi, «dic, quid faciamus?» || Illis dixit pulchrum-medium cor-

तपस्य् अग्निषु धर्मेषु मृगपक्षिषु चा 'नघाः ॥ ७० ॥
कुशलं वो महाभागाः स्वधर्मचरणेषु च ।
तैर् उक्ता कुशलम् भद्रे सर्वत्रे 'ति यशस्विनि ॥ ७१ ॥
ब्रूहि सर्वानवद्याङ्गि का त्वं किञ् च चिकीर्षसि ।
दृष्ट्वै 'व ते परं रूपन् द्युतिञ् च परमाम् इह ॥ ७२ ॥
विस्मयो नः समुत्पन्नः समाश्वसिहि मा शुचः ।
अस्या 'रण्यस्य देवी त्वम् उताहो ऽस्य महीभृतः ॥ ७३ ॥
अस्याश् च नद्याः कल्याणि वद सत्यम् अनिन्दिते ।
सा 'ब्रवीत् तान् ऋषीन् ना 'हम् अरण्यस्या 'स्य देवता ॥७४॥
न चा 'प्य् अस्य गिरेर् विप्रा नै 'व नद्याश् च देवता ।
मानुषीम् मां विजानीत यूयं सर्वे तपोधनाः ॥ ७५ ॥

---

pus *habens*: An fortunatis hic । in devotione, ignibus, officiis,
71. feris-avibus*que*, o puri-a peccatis! ॥ salus vobis, perfortunati! in
vestrorum-officiorum-effectionibusque? । Ab illis dictum *est* ei: «Sa-
72. lus, beata! ubique,» sic, «gloriosa! ॥ dic, omnibus-pulchris-membris
*praedita*, quae *es* tu? quidque facere cupis? । videndo sane tuam exi-
73. miam formam, splendoremque eximium hic, ॥ admiratio nobis orta
*est;* respira, ne moere! । *An* hujus sylvae dea tu? an hujus montis, ॥
74. hujusve amnis, fortunata? Dic veritatem, non-spreta!» । Illa dixit his
75. sapientibus: Non ego sylvae hujus *sum* dea, ॥ neque etiam hujus
montis, Brâhmani! non etiam amnisque dea; । humanam me scite

विस्तरेणा ऽभिधास्यामि तन् मे शृणुत सर्वशः ।
विदर्भेषु महीपालो भीमो नाम महीपतिः ॥ ७६ ॥
तस्य मान् तनयां सर्वे जानीत द्विजसत्तमाः ।
निषधाधिपतिर् धीमान् नलो नाम महायशाः ॥ ७७ ॥
वीरः सङ्ग्रामजिद् विद्वान् मम भर्ता विशाम् पतिः ।
देवताभ्यर्चनपरो द्विजातिजनवत्सलः ॥ ७८ ॥
गोप्ता निषधवंशस्य महातेजा महाबलः ।
सत्यवान् धर्मवित् प्राज्ञः सत्यसन्धो ऽरिमर्दनः ॥ ७९ ॥
ब्रह्मण्यो दैवतपरः श्रीमान् परपुरञ्जयः ।
नलो नाम नृपश्रेष्ठो देवराजसमद्युतिः ॥ ८० ॥
मम भर्ता विशालाक्षः पूर्णेन्दुवदनो ऽरिहा ।

---

76. vos cuncti, o devotionis-divites! ‖ Fuse referam, id a me audite
plane: | In Vidarbhis terrae-custos *est* Bhimus nomine, terrae-do-
77. minus; ‖ hujus me filiam cuncti scite, Brâhmanorum-optimi! | Ni-
78. schadhorum-regnator, sapiens, Nalus nomine, magnâ-gloriâ, ‖ heros,
in pugnâ-victor, gnarus, meus conjux *est* Visorum dominus, | Deo-
79. rum-cultui-addictus, Brâhmanorum-genti-amicus, ‖ custos Nischa-
dhorum-generis, magno-splendore, magnâ-vi, | veridicus, officio-
rum-gnarus, intelligens, vera-promissa *habens*, hostium-contritor, ‖
80. religiosus, Diis-addictus, felix, hostium-oppidorum-expugnator, | Nalus
81. nomine, regnatorum-optimus, Deorum-regi-similis-splendore, ‖ meus

आहर्ता क्रतुमुख्यानां वेदवेदाङ्गपारगः ॥ ८१ ॥
सपत्नानाम् मृधे हन्ता रविसोमसमप्रभः ।
स कैश्चिन् निकृतिप्रज्ञैर् अनार्यैर् अकृतात्मभिः ॥ ८२ ॥
आहूय पृथिवीपालः सत्यधर्मपरायणः ।
देवनकुशलैर् जिह्मैर् जितो राज्यं वसूनि च ॥ ८३ ॥
तस्य माम् अवगच्छध्वम् भार्यां राजर्षभस्य वै ।
दमयन्ती ति विख्याताम् भर्तुर् दर्शनलालसाम् ॥ ८४ ॥
सा वनानि गिरींश् चै व सरांसि सरितस् तथा ।
पल्वलानि च सर्वाणि तथा ऽरण्यानि सर्वशः ॥ ८५ ॥
अन्वेषमाणा भर्तारन् नलं रणविशारदम् ।
महात्मानङ् कृतास्त्रञ् च विचरामी ह दुःखिता ॥ ८६ ॥

---

conjux magnis-oculis, plenae-lunae *similem*-vultum *habens*, hostium-
occisor, I apparator sacrificiorum-praecipuorum, Vêdos-Vêdângos-
82. perlegens, II hostium in pugnâ occisor, soli-*et* lunae-similem-splendo-
rem *habens*, I is a quibusdam improbitatis-mentem *habentibus*, non-
83. venerandis, scelestis, II post provocationem, terrae-custos, veritatis-*et*
virtutis-studiosus, I ludi-peritis, pravis, victus *est et* regnum divitiae-
84. que; II hujus me scite uxorem regum-principis, I «Damayantia,» sic
85. nominatam, conjugis visum-desiderantem. II Haec (i.e. ego) sylvas,
montesque etiam, stagna, flumina ita, I paludesque omnes, ita lucos
86. omnino, — II quaerens conjugem Nalum, pugnae-peritum, I magna-

कच्चिद् भगवतां रम्यन् तपोवनम् इदन् नृपः ।
भवेत् प्राप्तो नलो राजा निषधानाञ् जनाधिपः ॥ ८७ ॥
यत्कृते ऽहम् इदन् दुर्गम् प्रपन्ना भृशदारुणम् ।
वनम् प्रतिभयङ् घोरं शार्दूलमृगसेवितम् ॥ ८८ ॥
यदि कैश्चिद् अहोरात्रैर् न द्रक्ष्यामि नलन् नृपम् ।
आत्मानं श्रेयसा योक्ष्ये देहस्या ऽस्य विमोचनात् ॥ ८९ ॥
को नु मे जीवितेना ऽर्थस् तम् ऋते पुरुषर्षभम् ।
कथम् भविष्याम्य् अद्या ऽहम् भर्तृशोकाभिपीडिता ॥ ९० ॥
तथा विलपतीम् एकाम् अरण्ये भीमनन्दिनीम् ।
दमयन्तीम् अथो ऽऽचुस् ते तापसाः सत्यदर्शिनः ॥ ९१ ॥
उदर्कस् तव कल्याणि कल्याणो भविता शुभे ।

---

87. nimum, gnarum-armorumque, — peragro hic afflicta. ‖ An excelsorum amoenam in devotionis-sylvam hanc princeps | sit profectus,
88. Nalus rex, Nischadhorum-regnator, ‖ cujus-causâ ego hanc inviam profecta *sum* valde-horrendam | in sylvam, timendam, terribilem, a
89. tigribus-*et* dorcadibus-cultam? ‖ Si intra aliquos dies-*et* noctes non videbo Nalum regem, | me felicitati jungam, a corpore hoc per
90. liberationem. ‖ Quaene mihi cum vitâ res illo sine hominum-principe? | Quomodo existam nunc ego ob conjugem-moerore-afflicta? ‖
91. Sic querenti, soli in sylvâ Bhîmi-filiae | Damayantiae, tum dixerunt
92. illi anachoretae veritatem-cernentes: ‖ Tempus futurum tibi, eximia!

वयम् पश्यामस् तपसा क्षिप्रन् द्रक्ष्यसि नैषधम् ॥ १२ ॥
निषधानाम् अधिपतिन् नलं रिपुनिपातिनम् ।
भैमि धर्मभृतां श्रेष्ठन् द्रक्ष्यसे विगतज्वरम् ॥ १३ ॥
विमुक्तं सर्वपापेभ्यः सर्वरत्नसमन्वितम् ।
तद् एव नगरम् भूयः प्रशासतम् अरिन्दमम् ॥ १४ ॥
द्विषताम् भयकर्तारं सुहृदां शोकनाशनम् ।
पतिन् द्रक्ष्यसि कल्याणि कल्याणाभिजनन् नृपम् ॥ १५ ॥
एवम् उक्त्वा नलस्ये 'ष्टाम् महिषीम् पार्थिवात्मजाम् ।
तापसा ऽन्तर्हिताः सर्वे साग्निहोत्राश्रमास् तदा ॥ १६ ॥
सा दृष्ट्वा महद् आश्चर्यं विस्मिता ह्य् अभवत् तदा ।
दमयन्त्य् अनवद्याङ्गी वीरसेननृपस्नुषा ॥ १७ ॥

---

eximium erit, pulchra! I Nos videmus per devotionem; cito videbis
93. Naischadhum, II Nischadhorum regnatorem, Nalum, hostium-occiso-
rem, I Bhaimia! jus-sustinentium optimum videbis, expertem-diffi-
94. cultatis, II solutum omnibus-peccatis, omnibus-gemmis-praeditum, I
95. illam quoque urbem porro regentem, hostis-domitorem, II inimico-
rum timoris-creatorem, amicorum moeroris-exstinctorem, I conju-
96. gem videbis, eximia! eximiâ-familiâ regem. II Sic fati ad Nali ama-
tam uxorem, regis-filiam, I anachoretae evanuerunt cuncti cum-igni
97. sacro-*et*-sedibus solitariis tunc. II Illa, tuita magnum miraculum,
stupefacta erat tunc I Damayantia pulchris-membris, Vîrasêni-regis-

किन् नु स्वप्नो मया दृष्टः को ऽयं विधिर् इहा ऽभवत् ।
क्व नु ते तापसाः सर्वे क्व तद् आश्रममण्डलम् ॥ ९८ ॥
क्व सा पुण्यजला रम्या नदी द्विजनिषेविता ।
क्व नु ते ह नगा हृद्याः फलपुष्पोपशोभिताः ॥ ९९ ॥
ध्यात्वा चिरम् भीमसुता दमयन्ती शुचिस्मिता ।
भर्तृशोकपरा दीना विवर्णवदना ऽभवत् ॥ १०० ॥
सा गत्वा ऽथा ऽपराम् भूमिं बाष्पसन्दिग्धया गिरा ।
विललापा ऽश्रुपूर्णाक्षी दृष्ट्वा ऽशोकतरुन् ततः ॥ १०१ ॥
उपगम्य तरुश्रेष्ठम् अशोकम् पुष्पितं वने ।
पल्लवापीडितं हृद्यं विहङ्गैर् अनुनादितम् ॥ १०२ ॥
अहो बता ऽयम् अगमः श्रीमान् अस्मिन् वनान्तरे ।

---

98. nurus. ‖ «An somnium a me visum? Quae haec fors hic fuit? | Ubine illi anachoretae cuncti? Ubi ille sedium solitariarum-orbis? ‖
99. Ubi ille purâ-lymphâ amoenus amnis ab avibus-cultus? | Ubine
100. illae arbores jucundae, fructibus-floribus*que*-ornatae?» ‖ Meditata diu Bhîmi-filia Damayantia sereno-risu, | de conjuge-moerori-dedita,
101. misera, pallido-vultu erat. ‖ Ea profecta tum in aliam regionem, lacrymis-obrutâ voce | questa est *cum* lacrymarum-plenis-oculis,
102. tuita *Asôcum*-arborem tum, ‖ aggressa arborum-optimam, *Asôcum* florentem in sylvâ, | gemmis-ornatam, jucundam, ab avibus perso-
103. nitam: ‖ «Eheu! proh! haec arbor felix in hoc sylvae-medio |

आपीडैर् बहुभिर् भाति श्रीमान् पर्वतराड् इव ॥ १०३ ॥
विशोकाङ् कुरु माङ् क्षिप्रम् अशोक प्रियदर्शन ।
वीतशोक भयाबाधङ् कच्चित् त्वन् दृष्टवान् नृपम् ॥ १०४ ॥
नलन् नामा ऽरिमर्दनन् दमयन्त्याः प्रियम् पतिम् ।
निषधानाम् अधिपतिन् दृष्टवान् असि मे प्रियम् ॥ १०५ ॥
एकवस्त्रार्धसंवीतं सुकुमारतनुत्वचम् ।
व्यसनेना ऽर्दितं वीरम् अरण्यम् इदम् आगतम् ॥ १०६ ॥
यथा विशोका गच्छेयम् अशोकनग तत् कुरु ।
सत्यनामा भवा ऽशोक अशोकः शोकनाशनः ॥ १०७ ॥
एवं सा ऽशोकवृक्षन् तम् आर्ता वै परिगम्य ह । *
जगाम दारुणतरन् देशम् भैमी वराङ्गना ॥ १०८ ॥

---

104. sertis multis splendet, felix montis-rex veluti. ‖ Expertem-moero-
ris fac me cito, *Asôce* jucundo-aspectu! | Vîtasôce, timore-non-
105. vexatum an tu tuitus regem, ‖ Nalum nomine, hostium-contritorem,
Damayantiae amatum conjugem? | Nischadhorum regnatorem *an*
106. tuitus es, meum amatum, ‖ unius-vestis-dimidio-indutum, tenerâ-
tenui-cute, | calamitate afflictum heroem, sylvam hanc aggres-
107. sum? ‖ Ut expers-moeroris abeam, *Asôce*-arbor, hoc fac! | Vero-
108. nomine esto, *Asôce! Asôcus tanquam* moeroris-exstinctor.» ‖ Sic
ea *Asôcum*-arborem illam afflicta sane circumgressa, | ivit in terribi-

सा ददर्श नगान् नैकान् नैकाश् च सरितस् तथा ।
नैकांश् च पर्वतान् रम्यान् नैकांश् च मृगपक्षिणः ॥१०९॥
कन्दरांश् च नितम्बांश् च नदीश् चा ऽद्भुतदर्शनाः ।
ददर्श तान् भीमसुता पतिम् अन्वेषती तदा ॥११०॥
गत्वा प्रकृष्टम् अध्वानन् दमयन्ती शुचिस्मिता ।
ददर्शा ऽथ महासार्थं हस्त्यश्वरथसङ्कुलम् ॥१११॥
उत्तरन् तन् नदीं रम्याम् प्रसन्नसलिलां शुभाम् ।
सुशान्ततोयां विस्तीर्णां ह्रदिनीं वेतसैर् वृताम् ॥११२॥
प्रोद्घुष्टाङ् क्रौञ्चकुररैश् चक्रवाकोपकूजिताम् ।
कूर्मग्राहझषाकीर्णां विपुलद्वीपशोभिताम् ॥११३॥
सा दृष्ट्वै ऽव महासार्थन् नलपत्नी यशस्विनी ।

---

109. liorem regionem Bhaimia eximia-femina. ‖ Ea vidit arbores multas, multosque amnes ita, | multosque montes amoenos, multasque feras-
110. *et* aves, ‖ specusque, collesque, fluminaque mira-visu; | videbat ea
111. Bhîmi-filia conjugem quaerens tunc. ‖ Postquam iverat per protractam viam Damayantia sereno-risu, | vidit tum magnum-comitatum
112. mercatorium, elephantorum-equorum-curruum-plenum, ‖ ultra eum, amnem amoenum, clarâ-lymphâ, faustum, | perplacidâ-aquâ *praedi-*
113. *tum* extensum fluvium, *vêtasis* circumdatum, ‖ personitum a cuculis-*et* haliaeetis, ab anatibus-circumsonitum, | testudinum-serpentum-
114. piscium-plenum, magnis-insulis-ornatum. ‖ Illa tuita ita magnum-

उपसर्प्य वरारोहा जनमध्यं विवेश ह ॥११४॥
उन्मत्तरूपा शोकार्त्ता तथा वस्त्रार्धसंवृता ।
कृशा विवर्णा मलिना पांशुध्वस्तशिरोरुहा ॥११५॥
तान् दृष्ट्वा तत्र मनुजाः केचिद् भीताः प्रदुद्रुवुः ।
केचिच् चिन्तापरास् तस्थुः केचित् तत्र प्रचुक्रुशुः ॥११६॥
प्रहसन्ति च ताङ् केचिद् अभ्यसूयन्ति चा ’परे ।
अकुर्वत दयाङ् केचित् पप्रच्छुश् चा ’पि भारत ॥११७॥
का ’सि कस्या ’सि कल्याणि किं वा मृगयसे वने ।
त्वान् दृष्ट्वा व्यथिताः स्मे ’ह कच्चित् त्वम् असि मानुषी ॥११८॥
वद सत्यं वनस्या ’स्य पर्वतस्या ’थवा दिशः ।
देवता त्वं हि कल्याणि त्वां वयं शरणङ् गताः ॥११९॥

---

comitatum Nali-uxor gloriosa, | aggressa pulchro-medio corpore
115. *praedita* hominum-medium intravit, || *cum* demente-formâ, moe-
rore-afflicta, ita vestis-dimidio-induta, | macra, pallida, lutulenta,
116. pulvere-obrutos-capillos *habens*. || Eam tuiti ibi homines, alii ti-
midi aufugiebant, | alii cogitationi-dediti stabant, alii ibi exclama-
117. bant, || irridentque eam alii, maledicuntque alii, | exercebant mise-
118. ricordiam alii, interrogabantque etiam, Bhârate: || Quae es, cujus es,
eximia? Quidve quaeris in sylvâ? | Te tuiti perturbati sumus hic.
119. An tu es humana? || Dic veritatem! Sylvae hujus, *an* montis, an
120. plagae | dea tu o eximia? Ad te nos in refugium profecti. || An

यक्षी वा राक्षसी वा त्वम् उताहो ऽसि सुराङ्गना ।
सर्वथा कुरु नः स्वस्ति रक्ष चा ऽस्मान् अनिन्दिते ॥ १२० ॥
यथा ऽयं सर्वथा सार्थः क्षेमी शीघ्रम् इतो व्रजेत् ।
तथा विधत्स्व कल्याणि यथा श्रेयो हि नो भवेत् ॥ १२१ ॥
तथो ऽक्ता तेन सार्थेन दमयन्ती नृपात्मजा ।
प्रत्युवाच ततः साध्वी भर्तृव्यसनपीडिता ॥ १२२ ॥
सार्थवाहञ् च सार्थञ् च जना ये तत्र केचन ।
युवस्थविरबालाश् च सार्थस्य च पुरोगमाः ॥ १२३ ॥
मानुषीम् मां विजानीत मनुजाधिपतेः सुताम् ।
नृपस्नुषां राजभार्याम् भर्तृदर्शनलालसाम् ॥ १२४ ॥
विदर्भराण् मम पिता भर्ता राजा च नैषधः ।

---

Yacshia an Râcshasia tu *es*, an es divina-femina? | Omnimodo
121. fac nobis salutem, tuereque nos, non-spreta! || Ut hic plane comitatus incolumis cito hinc eat, | sic constitue, eximia! ut felici-
122. tas nempe nobis sit. || Sic compellata ab illo comitatu, Damayantia regis-filia | respondit tum, bona, conjugis-calamitate-afflicta, ||
123. comitatus-ducique, comitatuique, homines qui ibi ulli, | juvenes-
124. senes-puerique, comitatusque praecessores, (iis respondit): || Humanam me scite, hominum-regnatoris filiam, | regis-nurum, regis-
125. uxorem, conjugis-visum-desiderantem. || Vidarbhorum-rex meus

नलो नाम महाभागस् तम् मार्गाम्य् अपराजितम् ॥ १२५ ॥
यदि जानीथ नृपतिङ् क्षिप्रं शंसत मे प्रियम् ।
नलम् पुरुषशार्दूलम् अमित्रगणसूदनम् ॥ १२६ ॥
ताम् उवाचा ऽनवद्याङ्गीं सार्थस्य महतः प्रभुः ।
सार्थवाहः शुचिर् नाम शृणु कल्याणि मद्वचः ॥ १२७ ॥
अहं सार्थस्य नेता वै सार्थवाहः शुचिस्मिते ।
मनुष्यन् नलनामानन् न पश्यामि यशस्विनि ॥ १२८ ॥
कुञ्जरद्वीपिमहिषशार्दूलर्क्षमृगान् अपि ।
पश्याम्य् अस्मिन् वने कृत्स्ने ह्य् अमनुष्यनिषेविते ॥ १२९ ॥
ऋते त्वाम् मानुषीम् मर्त्यन् न पश्यामि महावने ।
तथा नो यक्षराड् अद्य मणिभद्रः प्रसीदतु ॥ १३० ॥

---

pater *est*; conjux rexque Naischadhus, | Nalus nomine, perfortuna-
126. tus; eum quaero invictum. || Si scitis regem, cito indicate meum
amatum, | Nalum, hominum-principem, inimicorum-turbae-occi-
127. sorem. || Ei dixit pulchris-membris *praeditae* comitatus magni do-
minus, | mercator, Sutschis nomine: «Audi, eximia! meum-sermo
128. nem! || Ego *sum* comitatus dux mercator, sereno-risu praedita! |
129. hominem Nali-nomen *habentem* non video, gloriosa! || Elephantos-
pardos-bubalos-tigres-ursos-dorcades quoque | video in hac sylvâ
130. totâ, non-ab hominibus-cultâ. || Praeter te humanam, hominem
non video in magnâ-sylvâ. | Ita nobis Yacschorum-rex nunc Ma-

सा ऽब्रवीद् वणिजः सर्वान् सार्थवाहञ् च तन् ततः ।
क्व नु यास्यति सार्थो ऽयम् एतद् आख्यातुम् अर्हसि ॥१३१॥

सार्थवाह उवाच

सार्थो ऽयञ् चेदिराजस्य सुबाहोः सत्यदर्शिनः ।
क्षिप्रञ् जनपदङ् गन्ता लाभाय मनुजात्मजे ॥१३२॥

॥ इति नलोपाख्याने द्वादशः सर्गः ॥ १२ ॥

बृहदश्व उवाच

सा तच् छ्रुत्वा ऽनवद्याङ्गी सार्थवाहवचस् तदा ।
जगाम सह तेनै ऽव सार्थेन पतिलालसा ॥१॥

---

131. nibhadrus faveto.» ‖ Illa dixit mercatoribus cunctis, comitatus-ducique illi tum: | Quone ibit comitatus hic? id indicare velis. ‖

Comitatus-dux dixit:

132. Comitatus hic Tschêdis-regis, Subâhuis veritatem-cernentis, | cito in terram ibit, lucri causâ, hominis-filia! ‖

## LIBER DECIMUS TERTIUS.

Vrihadasvus dixit:

1. Illa hunc postquam audierat pulchris-membris *praedita* comitatus-ducis-sermonem tunc, | ivit cum hoc nempe comitatu, conjugem-

अथ काले बहुतिथे वने महति दारुणे ।
तडागं सर्वतोभद्रम् पद्मसौगन्धिकम् महत् ॥ २ ॥
ददृशुर् वणिजो रम्यम् प्रभूतयवसेन्धनम् ।
बहुपुष्पफलोपेतम् नानापक्षिनिषेवितम् ॥ ३ ॥
निर्मलस्वादुसलिलम् मनोहारि सुशीतलम् ।
सुपरिश्रान्तवाहास् ते निवेशाय मनो दधुः ॥ ४ ॥
सम्मते सार्थवाहस्य विविशुर् वनम् उत्तमम् ।
उवास सार्थः स महान् वेलाम् आसाद्य पश्चिमाम् ॥ ५ ॥
अथार्धरात्रसमये निःशब्दस्तिमिते तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथम् उपागमत् ॥ ६ ॥
पानीयार्थं गिरिनदीम् मदप्रस्रवणाविलाम् ।

---

2. desiderans. ‖ At post tempus multum in sylvâ magnâ, terribili | lacum
3. undique-faustum, lotis-bene odorum, magnum ‖ viderunt mercatores, amoenum, multo-gramine-*et* ligno, | multis-floribus-*et*-fructibus-prae-
4. ditum, a variis-avibus-cultum, | clarâ-dulci-aquâ, cor-rapientem, perfrigidum. | Perdefessos-equos *habentesque* illi ingressui animum ad-
5. hibuerunt. ‖ Assensu comitatus-ducis intrarunt sylvam excellentissimam. | Pernoctavit comitatus ille magnus, ripam aggressus occidenta-
6. lem. ‖ At mediae-noctis-tempore, tacito-*et* humido tunc, | dormiente
7. comitatu defesso, elephantorum-grex accessit, ‖ aquae-causâ, ad montanum-amnem temporum *suorum* succi-fluxu-turbidum. | Tum vidit

अथा ऽपश्यत सार्थन् तं सार्थजान् सुबहून् गजान् ॥ ७ ॥
ते तान् ग्राम्यगजान् दृष्ट्वा सर्वे वनगजास् तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥ ८ ॥
तेषाम् आपततां वेगः करिणान् दुःसहो ऽभवत् ।
नगाग्राद् इव शीर्णानां शृङ्गाणाम् पतताङ् क्षितौ ॥ ९ ॥
स्यन्दताम् अपि नागानाम् मार्गा नष्टा वनोद्भवैः ।
मार्गं संरुध्य संसुप्तम् पद्मिन्याः सार्थम् उत्तमम् ॥ १० ॥
स तम् ममर्द सहसा ऽचेष्टमानम् महीतले ।
हाहाकारम् प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः ॥ ११ ॥
वनगुल्मांश् च धावन्तो निद्रान्धा बहवो ऽभवन् ।
केचिद् दन्तैः करैः केचित् केचित् पद्भ्यां हता गजैः ॥ १२ ॥

---

8. comitatum illum, *et* comitatus-natos permultos elephantos. ‖ Isti istos mansuetos-elephantos tuiti cuncti sylvae-elephanti tunc, | ac-
9. currerunt cum velocitate, occidendi cupidi, ebrietate-ebrii. ‖ Horum accurrentium impetus elephantorum difficilis-sustentu fuit, | e montis-
10. vertice veluti eruptorum cacuminum labentium in terram. ‖ Currentibus autem elephantis, viae dirutae *sunt* arboribus. | Viâ obstructâ,
11. dormientem lotorum-lacûs comitatum excellentissimum ‖ ille *grex* illum contrivit cito, non-renitentem, in terrae-solo. | Heu-heu-
12. sonum edentes mercatores, refugium-petentes, ‖ ad sylvae-fruticesque currentes, somno-caeci multi erant. | Alii dentibus, probos-

निहतोष्ट्राश् च बहवः पदातिजनसङ्कुलाः ।
भयाद् आधावमानाश् च परस्परहतास् तदा ॥ १३ ॥
घोरान् नादान् विमुञ्चन्तो निपेतुर् धरणीतले ।
वृक्षेष्व् आरुह्य संरब्धाः पतिता विषमेषु च ॥ १४ ॥
एवम् प्रकारैर् बहुभिर् दैवेना ऽऽक्रम्य हस्तिभिः ।
राजन् विनिहतं सर्वं समृद्धं सार्थमण्डलम् ॥ १५ ॥
आरावः सुमहांश् चा ऽऽसीत् त्रैलोक्यभयकारकः ।
एषो ऽग्निर् उत्थितः कष्टस् त्रायध्वन् धावता ऽधुना ॥ १६ ॥
रत्नराशिर् विशीर्णो ऽयङ् गृह्णीध्वङ् किम् प्रधावथ ।
सामान्यम् एतद् द्रविणन् न मिथ्या वचनम् मम ॥ १७ ॥
एवम् एवा ऽभिभाषन्तो विद्रवन्ति भयात् तदा ।

---

13. cidibus alii, alii pedibus occisi *sunt* ab elephantis. ‖ Occisos-camelos *habentes*que multi, pedestribus-hominibus-admixti, | timore cur-
14. rentesque, alter-per alterum-occisi *sunt* tunc. ‖ Terribiles clamores edentes ceciderunt in terrae-solum, | in arbores enisi perturbati,
15. lapsi *sunt* in iniquisque *locis*. ‖ Sic modis multis, fato aggressis ab
16. elephantis, | rex! occisus *est* totus opulentus comitatus-orbis. ‖ Tumultus permagnusque erat, trium mundorum-timorem-faciens, | «hic
17. ignis ortus aerumnosus, servate *vos*, currite nunc! ‖ Gemmarum-cumulus contritus hic; sumite! Quid aufugitis? | Communis *est* haec
18. gaza; non falsus sermo meus!» ‖ Sic nempe acclamantes currunt

पुनर् एवा 'भिधास्यामि चिन्तयध्वं सकातराः ॥ १८ ॥
तस्मिंस् तथा वर्तमाने दारुणे जनसङ्क्षये ।
दमयन्ती च बुबुधे भयसन्त्रस्तमानसा । ॥ १९ ॥
अपश्यद् वैशसन् तत्र सर्वलोकभयङ्करम् ।
अदृष्टपूर्वन् तद् दृष्ट्वा बाला पद्मनिभेक्षणा ॥ २० ॥
संसक्तवदनाश्वासा उत्तस्थौ भयविह्वला ।
ये तु तत्र विनिर्मुक्ताः सार्थात् केचिद् अविक्षताः ॥ २१ ॥
ते ऽब्रुवन् सहिताः सर्वे कस्ये 'दङ् कर्मणः फलम् ।
नूनन् न पूजितो ऽस्माभिर् मणिभद्रो महायशाः ॥ २२ ॥
तथा यक्षाधिपः श्रीमान् न वै वैश्रवणः प्रभुः ।
न पूजा विघ्नकर्तॄणाम् अथवा प्रथमङ् कृता ॥ २३ ॥

---

19. timore tunc. | «Iterum sane memorabo; cogitate stulti!» || Hac ita
versante terribili hominum-clade, | Damayantia experrecta est, ti-
20. more-perterritâ-mente; || vidit caedem ibi totius-mundi-timorem-
facientem. | Non-conspectum-antea hoc tuita puella loto-similibus-
21. oculis || compresso-ore-expers-halitus surrexit timore-commota. |
22. Qui vero ibi servati e comitatu, aliqui illaesi, || hi dixerunt con-
juncti cuncti: «Cujus hic facti fructus? | certe non cultus a nobis
23. Manibhadrus magnâ-gloriâ, || ita Yacshorum-rex felix non *cultus*
sane, Vaisravanus dominus. | Non veneratio *est* interruptionem-

शकुनानाम् फलं वा ऽथ विपरीतम् इदन् ध्रुवम् ।
ग्रहा न विपरीतास् तु किम् अन्यद् इदम् आगतम् ॥ २४ ॥
अपरे त्व् अब्रुवन् दीना ज्ञातिद्रव्यविनाकृताः ।
या साव् अद्य महासार्थे नारी ह्य् उन्मत्तदर्शना ॥ २५ ॥
प्रविष्टा विकृताकारा कृत्वा रूपम् अमानुषम् ।
तये ऽयं विहिता पूर्वम् माया परमदारुणा ॥ २६ ॥
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयङ्करी ।
तस्याः सर्वम् इदम् पापन् ना ऽत्र कार्या विचारणा ॥ २७ ॥
यदि पश्येम ताम् पापां सार्थघ्नीन् नैकदुःखदाम् ।
लोष्टभिः पांशुभिश् चै ऽव तृणैः काष्ठैश् च मुष्टिभिः ॥ २८ ॥
अवश्यम् एव हन्याम सार्थस्य किल कृत्यकाम् ।

---

24. facientium, aut primum facta. — ‖ Avium fructus aut adversus hic
certe. — | Planetae non adversi forte? Quod aliud *est* hoc even-
25. tum?» — ‖ Alii vero dixerunt miseri, familiâ-opibus-orbati: |
26. «Quae illa hodie magnum-comitatum femina demente-visu ‖ in-
gressa, deformi-aspectu, factâ formâ non-humanâ, | ab eâ hae con-
27. stitutae *sunt* antea praestigiae maxime-terribiles; ‖ Râcshasiave certe,
Yacshiave, Pisatschiave timorem-faciens, | huic omne hoc peccatum,
28. non in eo facienda dubitatio. ‖ Si videremus hanc improbam, comi-
tatus-necatricem, multos-dolores-dantem, | glebis, pulveribusque
29. etiam, arundinibus, lignisque, pugnis, ‖ certe sane occideremus, co-

दमयन्ती तु तच् छ्रुत्वा वाक्यन् तेषां सुदारुणाम् ॥ २९ ॥
ह्रीता भीता च संविग्ना प्राद्रवद् यत्र काननम् ।
आशङ्कमाना तत् पापम् आत्मानम् पर्यदेवयत् ॥ ३० ॥
अहो ममो ऽपरि विधेः संरम्भो दारुणो महान् ।
ना ऽनुबध्नाति कुशलङ् कस्ये ऽदङ् कर्मणः फलम् ॥ ३१ ॥
न स्मराम्य् अशुभङ् किञ्चित् कृतङ् कस्यचिद् अण्व् अपि ।
कर्मणा मनसा वाचा कस्ये ऽदङ् कर्मणः फलम् ॥ ३२ ॥
नूनञ् जन्मान्तरकृतम् पापम् आपतितम् महत् ।
अपश्चिमाम् इमाङ् कष्टाम् आपदम् प्राप्तवत्य् अहम् ॥ ३३ ॥
भर्तृराज्यापहरणं स्वजनाच् च पराजयः ।
भर्त्रा सह वियोगश् च तनयाभ्याञ् च विच्युतिः ॥ ३४ ॥

---

mitatus profecto vexatricem.» | Damayantia vero, hoc audito sermone
30. illorum perterribili, || pudibunda, timidaque, perterrita, aufugit ubi
31. sylva. | Timens illud peccatum, se lamentata est: || «Eheu! me super
fati ira *est* terribilis, magna. | Non durat fortuna. — Cujus hic
32. facti fructus? || Non recordor iniquum ullum factum alicui exi-
33. guum quoque, | facto, mente, voce. Cujus hic facti fructus? || Certe
in vitâ-aliâ-commissum peccatum allapsum magnum! | ad infinitum
34. hoc aerumnosum infortunium profecta *sum* ego: || conjugis-regni-
raptus, a cognatisque separatio | a conjuge disjunctioque, a liberisque

निर्नाथता वने वासो बहुव्यालनिषेविते ।
अथा 'परेद्युः सम्प्राप्ते हतशिष्टजनास् तदा ॥ ३५ ॥
देशात् तस्माद् विनिष्क्रम्य शोचन्ति वैशसङ् कृतम् ।
भ्रातरम् पितरम् पुत्रं सखायञ् च नराधिप ॥ ३६ ॥
अशोचत् तत्र वैदर्भी किन् नु मे दुष्कृतङ् कृतम् ।
यो ऽपि मे निर्जने ऽरण्ये सम्प्राप्तो ऽयञ् जनार्णवः ॥ ३७ ॥
स हतो हस्तियूथेन मन्दभाग्यान् ममै 'व तत् ।
प्राप्तव्यं सुचिरन् दुःखन् नूनम् अद्या 'पि वै मया ॥ ३८ ॥
ना 'प्राप्तकालो म्रियते श्रुतं वृद्धानुशासनम् ।
यान् ना 'हम् अद्य मृदिता हस्तियूथेन दुःखिता ॥ ३९ ॥
न ह्य् अदैवङ् कृतङ् किञ्चिन् नराणाम् इह विद्यते ।

---

35. separatio, ‖ tutoris-privatio, in sylvâ habitatio a multis-serpentibus-cultâ.» | At postero die aggresso, occisorum-reliqui-homines tunc, ‖
36. e regione hac egressi, lugent caedem factam, | fratrem, patrem,
37. filium, amicumque, hominum-regnator! — ‖ Querebatur ibi Vaidarbhia: «Quodne a me peccatum commissum? | quod nempe mihi
38. in desertâ sylvâ congressum hoc hominum-mare, ‖ id occisum ab elephantorum-grege; adversâ fortunâ meâ certe hoc. | Adipiscendus
39. perlongus dolor certe nunc quoque a me. ‖ «Non non-aggressum-tempus *habens* moritur;» auditum senum-dictum; | quam ob rem non
40. ego hodie contrita sum ab elephantorum-grege, afflicta. ‖ Non enim

न च मे बालभावे ऽपि किञ्चित् पापकृतङ् कृतम् ॥ ४० ॥
कर्मणा मनसा वाचा यद् इदन् दुःखम् आगतम् ।
मन्ये स्वयंवरकृते लोकपालाः समागताः ॥ ४१ ॥
प्रत्याख्याता मया तत्र नलस्या ऽर्थाय देवताः ।
नूनन् तेषाम् प्रभावेन वियोगम् प्राप्तवत्य् अहम् ॥ ४२ ॥
एवमादीनि दुःखार्ता सा विलप्य वराङ्गना ।
प्रलापानि तदा तानि दमयन्ती पतिव्रता ॥ ४३ ॥
हतशिष्टैः सह तदा ब्राह्मणैर् वेदपारगैः ।
अगच्छद् राजशार्दूल चन्द्रलेखे ऽव शारदी ॥ ४४ ॥
गच्छन्ती सा ऽचिराद् बाला पुरम् आसादयन् महत् ।
सायाह्ने चेदिराजस्य सुबाहोः सत्यदर्शिनः ॥ ४५ ॥

---

expers-fati factum ullum hominum hic existit. | Non tamen a me
41. in infantiâ quoque ullum peccatum commissum, || facto, mente,
voce, quod hic dolor aggressus. | Puto, mariti electionis-causâ
42. mundi-custodes aggressi || repudiati a me ibi Nali causâ Dii; |
43. certe horum praepotentiâ disjunctionem aggressa ego.» || Sic-inci-
pientibus dolore-afflicta ea lamentata excellentissima femina | la-
44. mentis tunc illis, Damayantia conjugi-devota || cum occisorum-re-
liquis tunc Brâhmanis *Vêdos*-perlegentibus | ivit, regum princeps!
45. lunae-virga veluti nova. || Iens ea brevi femina ad urbem accessit
magnam, | vespere, Tschêdis-regis, Subahuis veritatem-cernentis. ||

अथ वस्त्रार्धसंवीता प्रविवेश पुरोत्तमम् ।
तां विह्वलाङ् कृशान् दीनाम् मुक्तकेशीम् अमार्जिताम् ॥४६॥
उन्मत्ताम् इव गच्छन्तीम् ददृशुः पुरवासिनः ।
प्रविशन्तीन् तु तान् दृष्ट्वा चेदिराजपुरीन् तदा ॥४७॥
अनुजग्मुस् तत्र बाला ग्रामिपुत्राः कुतूहलात् ।
सा तैः परिवृता ऽगच्छत् समीपं राजवेश्मनः ॥४८॥
ताम् प्रासादगता ऽपश्यद् राजमाता जनैर् वृताम् ।
धात्रीम् उवाच गच्छै ऽनाम् आनये ऽह ममा ऽन्तिकम् ॥४९॥
जनेन क्लिश्यते बाला दुःखिता शरणार्थिनी ।
तादृग् रूपञ् च पश्यामि विद्योतयति मे गृहम् ॥५०॥
उन्मत्तवेशा कल्याणी श्रीर् इवा ऽयतलोचना ।

---

46. Deinde vestis-dimidio-induta intravit urbium-excellentissimam. I
Eam perturbatam, macram, miseram, solutis-comis, non-purifica-
47. tam, II dementem veluti euntem, viderunt urbis-habitatores; I in-
48. trantem vero eam tuiti Tschêdis-regis-urbem tunc, II sequebantur
ibi pueri, vicanorum-filii, cum voluptate. I Illa ab his circumdata
49. ivit in propinquitatem regis-domûs. II Eam in palatii *superficiem*-
profecta vidit regis-mater ab hominibus septam. I Nutrici dixit: «I,
50. illam adduc huc in meam propinquitatem, II ab hominibus vexatur
femina, afflicta, refugio-egena; I talis forma autem, video, splenden-
51. tem reddit meam domum; II insanâ-veste *induta* eximia, *Sria* veluti

सा जनं वारयित्वा तम् प्रासादतलम् उत्तमम् ॥५१॥
आरोप्य विस्मिता राजन् दमयन्तीम् अपृच्छत ।
एवम् अप्य् असुखाविष्टा बिभर्षि परमं वपुः ॥५२॥
भासि विद्युद् इवा ऽभ्रेषु शंस मे का ऽसि कस्य वा ।
न हि ते मानुषं रूपम् भूषणैर् अपि वर्जितम् ॥५३॥
असहाया नरेभ्यश् च नो ऽद्विजस्य् अमरप्रभे ।
तच् छ्रुत्वा वचनन् तस्या भैमी वचनम् अब्रवीत् ॥५४॥
मानुषीम् मां विजानीहि भर्तारं समनुव्रताम् ।
सैरन्ध्रीञ् जातिसम्पन्नाम् भुजिष्याङ् कामवासिनीम् ॥५५॥
फलमूलाशनाम् एकां यत्रसायम्प्रतिश्रयाम् ।
असङ्ख्येयगुणो भर्ता माञ् च नित्यम् अनुव्रतः ॥५६॥

---

longis-oculis *praedita.»* | Illa, homines postquam arcuerat illos, pala-
52. tii-superficiem pulcherrimam ‖ postquam ascendere fecerat, stupe-
facta, rex! Damayantiam interrogavit: | «Sic quoque dolore-capta ge-
53. ris eximium corpus, ‖ nites fulgur veluti in nubibus; dic mihi, quae es,
cujusve? | non enim tibi humana forma, ornamentis quanquam orbata. ‖
54. Expers-comitum ab hominibus non times, immortalium-splendore
*praedita?»* | Hoc audito sermone illius, Bhaimia sermonem dixit: ‖
55. «Humanam me nosce, conjugi devotam, | opificem genere *nobili*-prae-
56. ditam, famulam ad arbitrium-habitantem, ‖ fructibus-radicibus-ves-
centem, solam, ubi-vesper-domum *habentem.* | Innumerabilibus-vir-

भक्ता 'हम् अपि तं वीरञ् छाये 'वा 'नुगता पथि ।
तस्य दैवात् प्रसङ्गो ऽभूद् अतिमात्रं स्म देवने ॥ ५७ ॥
द्यूते स निर्जितश् चै 'व वनम् एक उपेयिवान् ।
तम् एकवसनं वीरम् उन्मत्तम् इव विह्वलम् ॥ ५८ ॥
आश्वासयन्ती भर्तारम् अहम् अप्य् अगमं वनम् ।
स कदाचिद् वने वीरः कस्मिंश्चित् कारणान्तरे ॥ ५९ ॥
क्षुत्परीतस् तु विमनास् तद् अप्य् एकं व्यसर्जयत् ।
तम् एकवसनन् नग्नम् उन्मत्तवद् अचेतनम् ॥ ६० ॥
अनुव्रजन्ती बहुला न स्वपामि निशास् तदा ।
ततो बहुतिथे काले सुप्ताम् उत्सृज्य माङ् क्वचित् ॥ ६१ ॥
वाससो ऽर्धम् परिच्छिद्य त्यक्तवान् माम् अनागसम् ।

---

57. tutibus *praeditus est* conjux, mihique semper devotus; ‖ colensque ego quoque illum heroëm umbra veluti secuta in viâ. | Huic fato
58. amor fuit supra-modum erga ludum, ‖ in ludo is victus autem sylvam solus aggressus. | Eum unâ-veste *indutum,* heroëm, dementem quasi,
59. perturbatum, ‖ consolans conjugem ego quoque ivi in sylvam. | Iste
60. aliquando in sylvâ heros, quâpiam causae-occasione, ‖ fame-affectus nempe, expers-mentis, illam quoque unam dimisit. | Eum unâ-veste
61. *indutum,* nudum, demens-veluti expertem-mentis ‖ sequens, multas non dormio noctes tunc. | Deinde post multum tempus dormientem
62. in reliquendo me alicubi, ‖ vestis dimidium postquam absciderat, de-

तम् मार्गमाणा भर्तारन् दह्यमाना दिवानिशम् ॥ ६२ ॥
सा ऽहङ् कमलगर्भाभम् अपश्यन्ती हृदि प्रियम् ।
न विन्दाम्य् अमरप्रख्यम् प्रियम् प्राणेश्वरम् प्रभुम् ॥ ६३ ॥
ताम् अश्रुपरिपूर्णाक्षीं विलपन्तीन् तथा बहु ।
राजमाता ऽब्रवीद् आर्ताम् भैमीम् आर्ततरा स्वयम् ॥ ६४ ॥
वसस्व मयि कल्याणि प्रीतिर् मे परमा त्वयि ।
मृगयिष्यन्ति ते भद्रे भर्तारम् पुरुषा मम ॥ ६५ ॥
अपि वा स्वयम् आगच्छेत् परिधावन् इतस् ततः ।
इहै ऽव वसती भद्रे भर्तारम् उपलप्स्यसे ॥ ६६ ॥
राजमातुर् वचः श्रुत्वा दमयन्ती वचो ऽब्रवीत् ।
समयेनो ऽत्सहे वस्तुन् त्वयि वीरप्रजायिनि ॥ ६७ ॥

---

servit me expertem-peccatorum. I Eum quaerens conjugem, uror
63. die-*et* nocte. II Ipsa ego *sicut* loti-calyx-splendentem non-videns
in corde dilectum, I non invenio immortalibus-similem, dilectum
64. vitae-dominum excelsum.» II Ei lacrymis-impletos-oculos *habenti*,
lamentanti ita multum, I regis-mater dixit, tristi Bhaimiae, tristior
65. ipsa: II Habita apud me, eximia! gaudium mihi summum in te. I
66. Quaerent tuum, beata! conjugem homines mei, II etiamve ipse ad-
veniat, circumcurrens hic *et* illic. I Hic sane habitans, beata! conju-
67. gem adipisceris. II Regis-matris sermone audito, Damayantia sermo-
nem dixit: I Sub conditione possum habitare apud te, heroum-ge-

उच्छिष्टन् नै 'व भुञ्जीयान् न कुर्याम् पादधावनम् ।
न चा 'हम् पुरुषान् अन्यान् प्रभाषेयङ् कथञ्चन ॥ ६८ ॥
प्रार्थयेद् यदि माङ् कश्चिद् दण्ड्यस् ते स पुमान् भवेत् ।
वध्यश् च ते ऽसकृन् मन्द इति मे व्रतम् आहितम् ॥ ६९ ॥
भर्तुर् अन्वेषणार्थन् तु पश्येयम् ब्राह्मणान् अहम् ।
यद्य् एवम् इह कर्तव्यं वत्स्याम्य् अहम् असंशयम् ॥ ७० ॥
अतो ऽन्यथा न मे वासो वर्तते हृदये क्वचित् ।
ताम् प्रहृष्टेन मनसा राजमाते 'दम् अब्रवीत् ॥ ७१ ॥
सर्वम् एतत् करिष्यामि दिष्ट्या ते व्रतम् ईदृशम् ।
एवम् उक्त्वा ततो भैमीं राजमाता विशाम् पते ॥ ७२ ॥
उवाचे 'दन् दुहितरं सुनन्दान् नाम भारत ।

---

68. nitrix; ll relictum ne nempe edam, ne faciam pedibus-cursum, |
69. neque ego viros alios alloquar ullo modo. ll Petat si me quispiam,
punicndus a te iste vir sit, l occidendusque a te saepius stultus; sic
70. a me votum *est* positum. ll Conjugis investigationis-causâ vero videam Brâhmanos ego. l Si ita hic faciendum, habitabo ego, sine-
71. dubio; ll quam ita aliter non mihi habitatio versatur in corde ali-
72. cubi. l Ei laeto animo regis-mater hoc dixit: ll Omne hoc faciam; proh felicitatem, tibi *est* votum tale! l Sic fata, deinde, ad Bhaimiam
73. regis-mater, Visorum domine! ll dixit hoc filiae, Sunandae nomine,

सैरन्ध्रीम् अभिजानीष्व सुनन्दे देवरूपिणीम् ॥ ७३ ॥
वयसा तुल्यताम् प्राप्ता सखी तव भवत्व् इयम् ।
एतया सह मोदस्व निरुद्विग्नमनाः सदा ॥ ७४ ॥
ततः परमसंहृष्टा सुनन्दा गृहम् आगमत् ।
दमयन्तीम् उपादाय सखीभिः परिवारिता ॥ ७५ ॥

॥ इति नलोपाख्याने त्रयोदशः सर्गः ॥ १३ ॥

बृहदश्व उवाच

उत्सृज्य दमयन्तीन् तु नलो राजा विशाम् पते ।
ददर्श दावन् दह्यन्तम् महान्तङ् गहने वने ॥ १ ॥

---

Bhârate: | Opificem nosce, Sunanda! divina-formâ *praeditam!* ||
74. Aetate ad aequalitatem profecta, amica tua esto ea; | cum hac lae-
75. tare, expers-perterriti-animi semper. || Deinde maxime-laeta Su-
nanda domum adiit, | Damayantiam tollens ab amicis circumdata. ||

## LIBER DECIMUS QUARTUS.

Vrihadasvus dixit:

1. Relictâ Damayantiâ vero, Nalus rex, Visorum-domine! | vidit ig-
2. nem flagrantem magnum in densâ sylvâ. || Ibi audivit clamorem,

तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् ।
अभिधाव नले ऽत्य् उच्चैः पुण्यश्लोके ऽति चा ऽसकृत् ॥ २ ॥
मा भैर् इति नलश् चो ऽक्त्वा मध्यम् अग्नेः प्रविश्य तम् ।
ददर्श नागराजानं शयानङ् कुण्डलीकृतम् ॥ ३ ॥
स नागः प्राञ्जलिर् भूत्वा वेपमानो नलन् तदा ।
उवाच मां विद्धि राजन् नागङ् कर्कोटकन् नृप ॥ ४ ॥
मया प्रलब्धो महर्षिर् नारदः स महातपाः ।
तेन मन्युपरीतेन शप्तो ऽस्मि मनुजाधिप ॥ ५ ॥
तिष्ठ त्वं स्थावर इव यावद् एव नलः क्वचित् ।
इतो नेता हि तत्र त्वं शापान् मोक्ष्यसि मत्कृतात् ॥ ६ ॥
तस्य शापान् न शक्तो ऽस्मि पदाद् विचलितुम् पदम् ।

---

in medio, animantis cujuspiam: | «Accurre, Nale!» sic clarâ voce,
3. «Punyasloce!» sicque iterum iterumque. || «Ne time!» sic Nalusque fatus, medium ignis ingressus illud, | vidit serpentum-re-
4. gem, jacentem, annulum-factum. || Hic serpens, implicitis manibus dum erat, tremens Nalo tum | dixit: Me nosce, rex! serpentem Car-
5. côtacum, regnator! || A me deceptus *est* magnus-sapiens Nâradus, ille magnus-anachoreta; | ab eo, irâ-affecto, exsecratione affectus sum,
6. o hominum-regnator: || «Sta tu, immobilis veluti, donec nempe Nalus aliquando | hinc ducet; in hoc tu ab exsecratione evades a me
7. factâ.» || Illius exsecratione non potens sum pede movendi pedem. |

उपदेक्ष्यामि ते श्रेयस् त्रातुम् अर्हसि माम् भवान् ॥ ७ ॥
सखा च ते भविष्यामि मत्समो ना ऽस्ति पन्नगः ।
लघुश् च ते भविष्यामि शीघ्रम् आदाय गच्छ माम् ॥ ८ ॥
एवम् उक्त्वा स नागेन्द्रो बभूवा ऽङ्गुष्ठमात्रकः ।
तङ् गृहीत्वा नलः प्रायाद् देशन् दावविवर्जितम् ॥ ९ ॥
आकाशदेशम् आसाद्य विमुक्तङ् कृष्णवर्त्मना ।
उत्स्रष्टुकामन् तन् नागः पुनः कर्कोटको ऽब्रवीत् ॥ १० ॥
पदानि गणयन् गच्छ स्वानि नैषध कानिचित् ।
तत्र ते ऽहम् महाबाहो श्रेयो धास्यामि यत् परम् ॥ ११ ॥
ततः सङ्ख्यातुम् आरब्धम् अदशद् दशमे पदे ।
तस्य दष्टस्य तद्रूपङ् क्षिप्रम् अन्तरधीयत ॥ १२ ॥

---

8. Ostendam tibi felicitatem, servare velis me tu; ‖ amicusque tibi ero,
mei similis non est serpens; | levisque tibi ero cito, postquam sustu-
9. leris, i, me! ‖ Sic fatus hic serpentum-princeps, factus est digiti-
mensuram *habens*. | Eum postquam sumserat Nalus, ivit in regionem
10. igne-liberatam. ‖ Aëris-regionem aggressus solutam flammâ, | de-
11. ponendi cupido ei serpens iterum Carcôtacus dixit: ‖ Passuum nu-
merans, i, tuorum, Naischadhe! aliquos; | in hoc tibi ego, magnis-
12. brachiis *praedite!* felicitatem tribuam, quae eximia. ‖ Deinde nu-
merare exorsum momordit decimo (numerato) passu. | Ei morso
13. ipsius-forma cito interiit. ‖ Is, tuitus, stupefactus fuit, se defor-

स दृष्ट्वा विस्मितस् तस्याव् आत्मानं विकृतन् नलः ।
स्वरूपधारिणन् नागन् ददर्श च महीपतिः ॥ १३ ॥
ततः कर्कोटको नागः सान्त्वयन् नलम् अब्रवीत् ।
मया ते ऽन्तर्हितं रूपन् न त्वां विद्युर् जना इति ॥ १४ ॥
यत्कृते चा ऽसि निकृतो दुःखेन महता नल ।
विषेण स मदीयेन त्वयि दुःखन् निवत्स्यति ॥ १५ ॥
विषेण संवृतैर् गात्रैर् यावत् त्वान् न विमोक्ष्यति ।
तावत् त्वयि महाराज दुःखं वै स निवत्स्यति ॥ १६ ॥
अनागा येन निकृतस् त्वम् अनर्हो जनाधिप ।
क्रोधाद् असूययित्वा तं रक्षा मे भवतः कृता ॥ १७ ॥
न ते भयम् महावीर दंष्ट्रिभ्यः शत्रुतो ऽपि वा ।

---

matum, Nalus; | propriam ejus-formam-habentem serpentem vidit-
14. que terrae-dominus. || Deinde Carcôtacus serpens consolans Nalo
dixit: | Per me tua interiit forma, «ne te noscant homines,» sic (cogi-
15. tantem). || Cujus-causâque es afflictus dolore magno, Nale! | veneno
16. is meo in te dolorose habitabit. || Veneno circumdatis membris, quam
diu te non solvet, | tam diu in te, magne-rex! dolorose sane is habi-
17. tabit. || Innocens a quo offensus tu indignus, hominum-regnator! |
18. irâ exsecrando eum servatio a me tibi facta. || Non tibi metus, ma-
gne-heros! ab apris, ab hostibus etiamve, | a brahmânicis sapienti-

ब्रह्मर्षिभ्यश् च भविता मत्प्रसादान् नराधिप ॥ १८ ॥
राजन् विषनिमित्ता च न ते पीडा भविष्यति ।
सङ्ग्रामेषु च राजेन्द्र शश्वज् जयम् अवाप्स्यसि ॥ १९ ॥
गच्छ राजन् इतः सूतो बाहुको ऽहम् इति ब्रुवन् ।
समीप ऋतुपर्णस्य स हि वेदा 'क्षनैपुणम् ॥ २० ॥
अयोध्यान् नगरीं रम्याम् अद्य वै निषधेश्वर ।
स ते ऽक्षहृदयन् दाता राजा 'श्वहृदयेन वै ॥ २१ ॥
इक्ष्वाकुकुलजः श्रीमान् मित्रञ् चै 'व भविष्यति ।
भविष्यसि यदा 'क्षज्ञः श्रेयसा योक्ष्यसे तदा ॥ २२ ॥
समेष्यसि च दारैस् त्वम् मा स्म शोके मनः कृथाः ।
राज्येन तनयाभ्याञ् च सत्यम् एतद् ब्रवीमि ते ॥ २३ ॥

---

19. busque erit, meâ gratiâ, hominum-regnator! ‖ Rex! venenum-*tanquam* causam *habens*que non tibi tormentum erit; | in pugnisque,
20. regum-princeps semper victoriam adipisceris. ‖ I, rex! hinc, — «auriga Vâhucus ego,» sic dicens | coram Rituparno, is enim noscit ta-
21. lorum-scientiam — ‖ in Ayôdhyam urbem amoenam nunc, Nischadhorum-domine! | Is tibi talorum-scientiam dabit rex pro equorum-
22. scientiâ,' ‖ ex Icschvâcuis-stirpe-natus, felix, amicusque etiam erit. |
23. Eris quum talorum-gnarus, felicitati jungeris tum, ‖ congredierisque cum uxore tu, — ne moerori animum adhibeas, — | cum regno,
24. liberisque; veritatem hanc dico tibi. ‖ Tuam formamque quum videre

स्वरूपञ् च यदा द्रष्टुम् इच्छेथास् त्वन् नराधिप ।
संस्मर्तव्यस् तदा ते ऽहं वासश् चे 'दन् निवासयेः ॥ २४ ॥
अनेन वाससा छन्नः स्वरूपम् प्रतिपत्स्यसे ।
इत्य् उक्त्वा प्रददौ तस्मै दिव्यं वासोयुगन् तदा ॥ २५ ॥
एवन् नलञ् च सन्दिश्य वासो दत्त्वा च कौरव ।
नागराजस् ततो राजंस् तत्रै 'वा 'न्तरधीयत ॥ २६ ॥

॥ इति नलोपाख्याने चतुर्दशः सर्गः ॥ १४ ॥

वृहदश्व उवाच

तस्मिन्न् अन्तर्हिते नागे प्रययौ नैषधो नलः ।

---

cupias tu, hominum-regnator | recordandus tum tibi ego, vestemque
25. hanc induas. || Hac veste indutus tuam-formam recuperabis. | Sic
26. fatus, dedit ei coeleste vestium-par tum. || Sic Nalumque postquam
edocuerat, vestem dederatque, Caurave! | serpentum-rex tum, rex! ibi nempe evanuit.

## LIBER DECIMUS QUINTUS.

Vrihadasvus dixit:

1. Hic postquam evanuerat serpens profectus est Naischadhus Nalus, |

ऋतुपर्णस्य नगरम् प्राविशद् दशमे ऽहनि ॥ १ ॥
स राजानम् उपातिष्ठद् बाहुको ऽहम् इति ब्रुवन् ।
अश्वानां वाहने युक्तः पृथिव्यान् ना 'स्ति मत्समः ॥ २ ॥
अर्थकृच्छ्रेषु चै 'वा 'हम् प्रष्टव्यो नैपुणेषु च ।
अन्नसंस्कारम् अपि च जानाम्य् अन्यैर् विशेषतः ॥ ३ ॥
यानि शिल्पानि लोके ऽस्मिन् यच् चै 'वा 'न्यत् सुदुष्करम्
सर्वं यतिष्ये तत् कर्तुम् ऋतुपर्ण भरस्व माम् ॥ ४ ॥

ऋतुपर्ण उवाच

वस बाहुक भद्रन् ते सर्वम् एतत् करिष्यसि ।
शीघ्रयाने सदा बुद्धिर् ध्रियते मे विशेषतः ॥ ५ ॥
स त्वम् आतिष्ठ योगन् तं येन शीघ्रा हया मम ।

---

2. Rituparni urbem intravit decimo die. ॥ Is regem adiit, Vâhucus ego, sic dicens, । equorum rectioni aptus in terrâ non est mihi-similis; ॥
3. in rerum-difficultatibusque etiam ego interrogandus, in disciplinisque; । ciborum-paratum etiamque intelligo prae aliis praecipue. ॥
4. Quae artes in mundo hoc, quodque etiam aliud perdifficile-factu, । omne studebo hoc facere, Rituparne! conduc me!

Rituparnus dixit:

5. Habita, Vâhuce! salus tibi! omne hoc facies. । In veloce-cursu sem-
6. per animus tenetur meus praecipue. ॥ Is tu exerce negotium hoc, ut

भवेयुर् अश्वाध्यक्षो ऽसि वेतनन् ते शतं शताः ॥ ६ ॥
त्वाम् उपस्थास्यतश् चे 'व नित्यं वार्ष्णेयजीवलौ ।
एताभ्यां रंस्यसे सार्धं वस वै मयि बाहुक ॥ ७ ॥
एवम् उक्तो नलस् तेन न्यवसत् तत्र पूजितः ।
ऋतुपर्णस्य नगरे सहवार्ष्णेयजीवलः ॥ ८ ॥
स वै तत्रा 'वसद् राजा वैदर्भीम् अनुचिन्तयन् ।
सायं सायं सदा चे 'मं श्लोकम् एकञ् जगाद ह ॥ ९ ॥
क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य कं वा सा 'द्यो 'पतिष्ठति ॥ १० ॥
एवम् ब्रुवन्तं राजानन् निशायाञ् जीवलो ऽब्रवीत् ॥ ११ ॥
काम् एनां शोचसे नित्यं श्रोतुम् इच्छामि बाहुक ।

---

veloces equi mei | sint; equorum-praefectus es; merces tua centies
7. centum. ‖ Tibi aderuntque etiam semper Vârschnêyus-*et* Dschîva-
8. lus, | cum iis ludes; habita apud me Vâhuce! ‖ Sic compellatus Na-
lus ab illo, habitavit ibi honoratus, | in Rituparni urbe, cum-Vâr-
9. schnêyo-*et* Dschîvalo. ‖ Is ibi habitavit rex, Vaidarbhiam cogi-
tans; | et vespere, vespere semper hunc Slôcum unum pronuntia-
10. vit: ‖ «Ubine illa fame-siti-afflicta, defessa, jacet pia? | recordans
11. hujus stulti? Cuive ea nunc adest?» ‖ Sic dicenti regi noctu Dschî-
12. valus dixit: ‖ Quam illam miseraris semper? Audire cupio, Vâhuce! |

आयुष्मन् कस्य वा नारी याम् एवम् अनुशोचसि ॥ १२ ॥
तम् उवाच नलो राजा मन्दप्रज्ञस्य कस्यचित् ।
आसीद् बहुमता नारी तस्या ऽदृढतरं वचः ॥ १३ ॥
स वै केनचिद् अर्थेन तया मन्दो व्ययुज्यत ।
विप्रयुक्तः स मन्दात्मा भ्रमत्य् असुखपीडितः ॥ १४ ॥
दह्यमानः स शोकेन दिवारात्रम् अतन्द्रितः ।
निशाकाले स्मरंस् तस्याः श्लोकम् एकं स्म गायति ॥ १५ ॥
स विभ्रमन् महीं सर्वाङ् क्वचिद् आसाद्य किञ्चन ।
वसत्य् अनर्हस् तद्दुःखम् पुनर् एवा ऽनुसंस्मरन् ॥ १६ ॥
सा तु तम् पुरुषन् नारी कृच्छ्रे ऽप्य् अनुगता वने ।
त्यक्ता तेना ऽल्पपुण्येन दुष्करं यदि जीवति ॥ १७ ॥

---

Longam vitam promittens! cuive *est* femina, quam sic miseraris? ‖
13. Ei dixit Nalus rex: Stultâ-mente *praedito* cuipiam | fuit multi-aesti-
14. mata femina; illius non valde-stabile dictum. ‖ Is aliquâ de causâ
ab illâ stultus disjunctus est. | Disjunctus is stulto-animo *praedi-*
15. *tus* errat dolore-afflictus. ‖ Ustus is moerore die-nocte perpetuo, |
16. noctis-tempore, recordans illius, distichon unum canit. ‖ Is peragrans
terram totam, alicubi aggressus uspiam | habitat indignus, illius-do-
17. lorem rursus quoque recordans. ‖ Illa vero illum virum femina
in miseriâ quoque secuta, in sylvâ | deserta ab eo parvâ-virtute
18. *praedito*, o grave-facinus! si vivit. ‖ Sola femina, ignaraque

एका बाला 'नभिज्ञा च मार्गाणाम् अतथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥ १८ ॥
श्वापदाचरिते नित्यं वने महति दारुणे ।
त्यक्ता तेना 'ल्पभाग्येन मन्दप्रज्ञेन मारिष ॥ १९ ॥
इत्य् एवन् नैषधो राजा दमयन्तीम् अनुस्मरन् ।
अज्ञातवासन् न्यवसद् राज्ञस् तस्य निवेशने ॥ २० ॥

॥ इति नलोपाख्याने पञ्चदशः सर्गः ॥ १५ ॥

बृहदश्व उवाच

हृतराज्ये नले भीमः सभार्ये प्रेष्यतां गते ।

---

viarum, non-ita-merita, | fame-siti-affecta, o grave-facinus! si
19. vivit. || A bestiis rapacibus-aditâ semper in sylvâ magnâ, terribili, | deserta ab illo, parvâ-fortunâ, stultâ-mente *praedito*, vene-
20. rande! || Sic nempe Naischadhus rex, Damayantiam recordans, | ignotâ-habitatione habitabat in regis illius domo.

## LIBER DECIMUS SEXTUS.

Vrihadasvus dixit:

1. Abreptum-regnum *habente* Nalo, Bhîmus, cum-conjuge in servitu-

द्विजान् प्रस्थापयामास नलदर्शनकाङ्क्षया ॥ १ ॥
सन्दिदेश च तान् भीमो वसु दत्त्वा च पुष्कलम् ।
मृगयध्वन् नलं यूयन् दमयन्तीञ् च मे सुताम् ॥ २ ॥
अस्मिन् कर्मणि सम्पन्ने विज्ञाते निषधाधिपे ।
गवां सहस्रन् दास्यामि यो वस् ताव् आनयिष्यति ॥ ३ ॥
अग्रहारांश् च दास्यामि ग्रामन् नगरसम्मितम् ।
न चेत् शक्याव् इहा ''नेतुन् दमयन्ती नलो ऽपि वा ॥ ४ ॥
ज्ञातमात्रे ऽपि दास्यामि गवान् दश शतन् धनम् ।
इत्य् उक्तास् ते ययुर् हृष्टा ब्राह्मणाः सर्वतोदिशम् ॥ ५ ॥
पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया ।
नै 'व क्वा 'पि प्रपश्यन्ति नलं वा भीमपुत्रिकाम् ॥ ६ ॥

---

dinem profecto, I Brâhmanos misit, Nalum-videndi-cupiditate. II
2. Mandavitque iis Bhîmus, divitias postquam dederat eximias: I «Quae-
3. rite Nalum vos, Damayantiamque meam filiam! II Hoc negotio facto,
cognito Nischadhorum-regnatore, I vaccarum mille dabo *ei*, qui ve-
4. strum eos adducet, II victuales resque dabo, vicum oppido-parem. I
5. Nisi possunt huc adduci Damayantia Nalus etiamve, II cognito tan-
tum, etiam dabo vaccas decies centum, opulentiam.» I Sic compellati
6. illi iverunt laeti Brâhmani, omnes-plagas versus, II in oppida-regna,
quaerentes Naischadhum cum uxore; I non vero alicubi vident Na-

ततश् चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः ।
विचिन्वानो ऽथ वैदर्भीम् अपश्यद् राजवेश्मनि ॥ ७ ॥
पुण्याहवाचने राज्ञः सुनन्दासहितां स्थिताम् ।
मन्दम् प्रख्यायमानेन रूपेणा ऽप्रतिमेन ताम् ।
निबद्धाम् धूमजालेन प्रभाम् इव विभावसोः ॥ ८ ॥
तां समीक्ष्य विशालाक्षीम् अधिकम् मलिनाङ्ग कृशाम् ।
तर्कयामास भैमी ऽति कारणैर् उपपादयन् ॥ ९ ॥

सुदेव उवाच

यथे ऽयम् मे पुरा दृष्टा तथारूपे ऽयम् अङ्गना ।
कृतार्थो ऽस्म्य् अद्य दृष्ट्वे ऽमां लोककान्ताम् इव श्रियम् ॥ १० ॥
पूर्णचन्द्रनिभां श्यामाञ् चारुवृत्तपयोधराम् ।

---

7. lum *et* Bhîmi-filiam. ‖ Deinde Tschêdi-purim amoenam Sudêvus nomine Brâhmanus | perscrutans tunc, Vaidarbhiam vidit in regis-domo, ‖
8. in puri-diei-nuntiatione regis, cum Sunandâ-simul versantem, | parum laudatâ formâ, incomparabili, eam, | involutam nebulae-reti lu-
9. cem veluti solis. ‖ Eam tuitus magnis-oculis *praeditam,* supra modum lutulentam, macram, | cogitavit, «Bhaimia,» sic, rationibus colligens.

Sudêvus dixit:

10. Sicut ea a me antea visa, sic-formam *habens* est haec femina. | Factam rem *habens* sum nunc, tuitus hanc, a mundo-dilectam veluti
11. *Sriam,* ‖ plenae-lunae-similem, nigram, *cum* pulchris-*et*-rotundis-

कुर्वन्तीम् प्रभया देवीं सर्वा वितिमिरा दिशः ॥११॥
चारुपद्मविशालाक्षीम् मन्मथस्य रतीम् इव ।
इष्टां समस्तलोकस्य पूर्णचन्द्रप्रभाम् इव ॥१२॥
विदर्भसरसस् तस्माद् दैवदोषाद् इवो ऽद्धृताम् ।
मलपङ्कानुलिप्ताङ्गीम् मृणालीम् इव चो ऽद्धृताम् ॥१३॥
पौर्णमासीम् इव निशां राहुग्रस्तनिशाकराम् ।
पतिशोकाकुलान् दीनां शुष्कस्रोतान् नदीम् इव ॥१४॥
विध्वस्तपर्णकमलां वित्रासितविहङ्गमाम् ।
हस्तिहस्तपरामृष्टां व्याकुलाम् इव पद्मिनीम् ॥१५॥
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ।

mammis, | facientem splendore reginam omnes expertes-obscuritatis
12. plagas, || pulchris-loto (similibus)-magnis-oculis *praeditam*, Manmathi maritam veluti, | amatam universi-mundi, plenae-lunae-splendore
13. *praeditam* veluti; || e Vidarbhorum-lacu illo fati-culpâ veluti avulsam, | luto-coeno-obducta membra *habentem*, loti fibram velutique
14. avulsam; || plenilunii veluti noctem, a Rahue-voratâ-lunâ, | de con-
15. juge-moerore-turbatam, miseram, siccato-fluctu amnem veluti; || lapsis-foliis-lotos *habentem*, perterritis-avibus *praeditum*; | ab elephanti-proboscide-agitatum, perturbatum veluti lotorum-lacum; ||
16. teneram, pulchris-membris *praeditam*, gemmarum-sedis-domum-merentem, | ustam veluti sole, loti fibram velutique avul-

दह्यमानाम् इवा ऽर्केण मृणालीम् इव चो ऽद्धृताम् ॥१६॥
रूपौदार्यगुणोपेताम् मण्डनार्हाम् अमण्डिताम् ।
चन्द्रलेखाम् इव नवां व्योम्नि नीलाभ्रसंवृताम् ॥१७॥
कामभोगैः प्रियैर् हीनां हीनाम् बन्धुजनेन च ।
देहन् धारयतीन् दीनाम् भर्तृदर्शनकाङ्क्षया ॥१८॥
भर्ता नाम परन् नार्या भूषणम् भूषणैर् विना ।
एषा हि रहिता तेन शोभमाना न शोभते ॥१९॥
दुष्करङ् कुरुते ऽत्यन्तं हीनो यद् अनया नलः ।
धारयत्य् आत्मनो देहन् न शोकेना ऽपि सीदति ॥२०॥
इमाम् असितकेशान्तां शतपत्रायतेक्षणाम् ।
सुखार्हान् दुःखितान् दृष्ट्वा ममा ऽपि व्यथते मनः ॥२१॥

---

17. sam, ॥ formae-*et* liberalitatis-virtute-praeditam, ornatu-dignam, inornatam, । lunae-virgam veluti novam in coelo, nigris-nubibus-
18. tectam, ॥ amoris-voluptatibus caris orbatam, orbatam propinquorum-turbâque, । corpus sustinentem, miseram, conjugem-videndi-cupidi-
19. tate. ॥ Conjux nempe eximium *est* feminae ornamentum sine ornamen-
20. tis; । haec enim relicta ab illo splendens non splendet. ॥ Difficile-factu facit ultramodum, privatus quod hac Nalus । sustinet suum cor-
21. pus, non moerore vero tabescit. ॥ Hanc nigris-comis *praeditam*, loto *similibus*-longis-oculis, । gaudio-dignam, afflictam videndo

कदा नु खलु दुःखस्य पारं यास्यति वै शुभा ।
भर्तुः समागमात् साध्वी रोहिणी शशिनो यथा ॥२२॥
अस्या नूनम् पुनर्लाभान् नैषधः प्रीतिम् एष्यति ।
राजा राज्यपरिभ्रष्टः पुनर् लब्ध्वा च मेदिनीम् ॥२३॥
तुल्यशीलवयोयुक्तान् तुल्याभिजनसंवृताम् ।
नैषधो ऽर्हति वैदर्भीन् तञ् चेयम् असितेक्षणा ॥२४॥
युक्तन् तस्याप्रमेयस्य वीर्यसत्त्ववतो मया ।
समाश्वासयितुम् भार्याम् पतिदर्शनलालसाम् ॥२५॥
अहम् आश्वासयाम्य् एनाम् पूर्णचन्द्रनिभाननाम् ।
अदृष्टपूर्वान् दुःखस्य दुःखार्तान् ध्यानतत्पराम् ॥२६॥

---

22. meus quoque laborat animus. ‖ Quandone tandem doloris ad ulteriorem ripam ibit pulchra, | conjugis congressu, bona, Rohinia lu-
23. nae sicut (*congressu*)? ‖ Hujus certe recuperatione Naischadhus ad gaudium ibit | rex e regno lapsus, rursus adeptusque terram. ‖
24. Pari-virtuti-*et*-aetati-junctam, pari-familiâ-instructam | Naischa-
25. dhus meretur Vaidarbhiam, eumque illa nigris-oculis. ‖ Conveniens illius incomparabilis, fortitudine-*et* mente praediti *est* mihi | con-
26. solari uxorem, conjugis-visum-desiderantem. ‖ Ego consolor eam, plenae-lunae-simili-vultu *praeditam*, | quae non vidit antea dolorem, dolore-afflictam, meditationi-addictam. ‖

वृहदश्व उवाच

एवं विमृश्य विविधैः कारणैर् लक्षणैश् च ताम् ।
उपगम्य ततो भैमीं सुदेवो ब्राह्मणो ऽब्रवीत् ॥ २७ ॥
अहं सुदेवो वैदर्भि भ्रातुस् ते दयितः सखा ।
भीमस्य वचनाद् राज्ञस् त्वाम् अन्वेष्टुम् इहा ऽऽगतः ॥ २८ ॥
कुशलस् ते पिता राज्ञी जननी भ्रातरश् च ते ।
आयुष्मन्तौ कुशलिनौ तत्रस्थौ दारकौ च तौ ॥ २९ ॥
त्वत्कृते बन्धुवर्गाश् च गतसत्त्वा इवा ऽऽसते ।
अन्वेष्टारो ब्राह्मणाश् च भ्रमन्ति शतशो महीम् ॥ ३० ॥
अभिज्ञाय सुदेवन् तन् दमयन्ती युधिष्ठिर ।
पर्यपृच्छत तान् सर्वान् क्रमेण सुहृदः स्वकान् ॥ ३१ ॥

---

Vrihadasvus dixit:

27. Sic postquam consideraverat variis rationibus notisque eam, | aggres-
28. sus, deinde Bhaimiae Sudêvus Brâhmanus dixit: || «Ego *sum* Sudê-
vus, Vaidarbhia! fratris tui dilectus amicus, | Bhîmi dicto regis te
29. quaesitum huc aggressus. || Salvus *est* tuus pater, regina genitrix,
fratresque illi; | et longam vitam promittentes salvi sunt ibi-moran-
30. tes parvuli illi. || Tuâ-causâ propinquorum-turbae vero expertes-
mentis veluti sedent; | quaerentes Brâhmanique peragrant centeni
31. terram.» || Cognito Sudêvo illo, Damayantia, Yudhishthire! | in-
32. terrogavit de illis omnibus ex ordine amicis suis; || flevitque valde, rex!

रुरोद च भृशं राजन् वैदर्भी शोककर्षिता ।
दृष्ट्वा सुदेवं सहसा भ्रातुर् इष्टन् द्विजोत्तमम् ॥ ३२ ॥
ततो रुदन्तीन् तान् दृष्ट्वा सुनन्दा शोककर्शिताम् ।
सुदेवेन सहै 'कान्ते कथयन्तीञ् च भारत ॥ ३३ ॥
जनित्र्याः कथयामास सैरन्ध्री रुदिते भृशम् ।
ब्राह्मणेन सहा 'गम्य तां वेत्थ यदि मन्यसे ॥ ३४ ॥
अथ चेदिपतेर् माता राज्ञश् चा 'न्तःपुरात् तदा ।
जगाम यत्र सा बाला ब्राह्मणेन सहा 'भवत् ॥ ३५ ॥
ततः सुदेवम् आनाय्य राजमाता विशाम् पते ।
पप्रच्छ भार्या कस्ये 'यं सुता वा कस्य भाविनी ॥ ३६ ॥
कथञ् च भ्रष्टा ज्ञातिभ्यो भर्तुर् वा वामलोचना ।

---

Vaidarbhia dolore-vexata, | tuita Sudêvum subito, fratris dilectum
33. Brâhmanorum-excellentissimum. || Deinde flentem eam tuita Su-
nanda, moerore-attenuatam, | cum Sudêvo secreto loquentemque,
34. Bhârate! || Genitrici dixit: «Opifex flet valde, | cum Brâhmano con-
35. gressa; eam nosces, si putas.» || Deinde Tshêdis-domini mater e re-
gis gynaeceo tunc | ivit *eo,* ubi illa femina cum Brâhmano erat. ||
36. Deinde, Sudêvum adducendum postquam curaverat regis-mater, Vi-
sorum domine, | interrogavit: Uxor cujus ista, filiave cujus, egregia? ||
37. Quomodoque separata a propinquis, a conjugeve, pulchris-oculis

त्वया च विदिता विप्र कथम् एवङ् गता सती ॥ ३७ ॥
एतद् इच्छाम्य् अहं श्रोतुन् त्वत्तः सर्वम् अशेषतः ।
तत्त्वेन हि ममा ऽऽचक्ष्व पृच्छन्त्या देवरूपिणीम् ॥ ३८ ॥
एवम् उक्तस् तया राजन् सुदेवो द्विजसत्तमः ।
सुखोपविष्ट आचष्टे दमयन्त्या यथातथम् ॥ ३९ ॥

॥ इति नलोपाख्याने षोडशः सर्गः ॥ १६ ॥

सुदेव उवाच

विदर्भराजो धर्मात्मा भीमो नाम महाद्युतिः ।
सुते ऽयन् तस्य कल्याणी दमयन्ती ऽति विश्रुता ॥ १ ॥

---

*praedita?* | A teque cognita *est*, Brâhmane! quomodo, sic profecta bo-
38. na? || Hoc cupio ego audire a te omne plane. | Accurate mihi memora
39. interroganti divinâ-formâ *praeditam*. || Sic compellatus ab illâ, rex! Sudêvus Brâhmanorum-optimus, | cum voluptate-sedens memoravit, Damayantiae sicut-verum.

### LIBER DECIMUS SEPTIMUS.

Sudêvus dixit:

1. Vidarbhorum-rex justo-animo *est* Bhîmus nomine, magno-splendore praeditus, | filia haec *est* istius, eximia, «Damayantia,» sic cele-

राजा तु नैषधो नाम वीरसेनसुतो नलः ।
भार्ये 'यन् तस्य कल्याणी पुण्यश्लोकस्य धीमतः ॥ २ ॥
स वै द्यूते जितो भ्रात्रा हृतराज्यो महीपतिः ।
दमयन्त्या गतः सार्धन् न प्राज्ञायत कर्हिचित् ॥ ३ ॥
ते वयन् दमयन्त्यर्थे चरामः पृथिवीम् इमाम् ।
से 'यम् आसादिता बाला तव पुत्रनिवेशने ॥ ४ ॥
अस्या रूपेण सदृशी मानुषी न हि विद्यते ।
अस्या ह्य् एष भ्रुवोर् मध्ये सहजः पिप्लुर् उत्तमः ॥ ५ ॥
श्यामायाः [redacted] लक्षितो ऽन्तर्हितो मया ।
मलेन संवृतो ह्य् अस्यास् छन्नो ऽभ्रेण 'व चन्द्रमाः ॥ ६ ॥
चिह्नभूतो विभूत्यर्थम् अयन् धात्रा विनिर्मितः ।

---

2. brata. ‖ Rex vero Naischadhus nomine, Virasêni-filius Nalus; | uxor
3. haec *est* istius, eximia, Punyaslôci sapientis. ‖ Is vero in ludo victus a
fratre, privatus-regno terrae-dominus, | cum Damayantiâ profectus
4. simul non cognoscebatur unquam. ‖ Ipsi nos Damayantiae-causâ pera-
5. gramus terram hanc; | ea haec *a me* adita femina in tui filii-domo. ‖ Ei
formâ similis humana non enim existit. | Ejus autem hic in superci-
6. liorum medio ingenitus naevus pulcherrimus, ‖ nigrae, loto-similis
conspectus est, qui interiit, a me; | sorde obductus enim illius, tecta
7. nube veluti luna. ‖ Macula-existens excellentiae-causâ haec a Brah-

प्रतिपत्कलुषस्ये ’न्दोर् लेखा ना ’तिविराजते ॥ ७ ॥
न चा ’स्या नश्यते रूपं वपुर्मलसमाचितम् ।
असंस्कृतम् अभिव्यक्तम् भाति काञ्चनसन्निभम् ॥ ८ ॥
अनेन वपुषा बाला पिप्लुना ’नेन सूचिता ।
लक्षिते ’यम् मया देवी निभृतो ऽग्निर् इवो ’ष्मणा ॥ ९ ॥
वृहदश्व उवाच
तच् छ्रुत्वा वचनन् तस्य सुदेवस्य विशाम् पते ।
सुनन्दा शोधयामास पिप्लुप्रच्छादनम् मलम् ॥ १० ॥
स मलेना ’पकृष्टेन पिप्लुस् तस्या व्यरोचत ।
दमयन्त्यास् तदा व्यभ्रे नभसी ’व निशाकरः ॥ ११ ॥
पिप्लुन् दृष्ट्वा सुनन्दा च राजमाता च भारत ।

---

mane formata, | interlunio-turbidae lunae virga non valdè-splendet. ||
8. Non tamen illius (*Damayantiae*) perit forma corporis-sorde-obducta, |
9. inornata manifesto splendet auro-similis. || Isto corpore femina, naevo isto praedita, | animadversa *est* ea a me regina, occultus ignis veluti calore.

Vrihadasvus dixit:

10. Hoc audito sermone illius Sudêvi, Visorum domine! | Sunanda ab-
11. luit naevum-tegentem sordem. || Is, sorde detractâ, naevus illius splendebat | Damayantiae tunc, experte-nubium in coelo veluti
12. luna. || Post naevi conspectum Sunandaque regis-materque, Bhârate! |

रुदत्यौ ताम् परिष्वज्य मुहूर्तम् इव तस्थतुः ॥ १२ ॥
उत्सृज्य बाष्पं शनकै राजमाते 'दम् अब्रवीत् ।
भगिन्या दुहिता मे ऽसि पिप्लुना 'नेन सूचिता ॥ १३ ॥
अहञ् च तव माता च राज्ञस् तस्य महात्मनः ।
सुते दशार्णाधिपतेः सुदाम्नश् चारुदर्शने ॥ १४ ॥
भीमस्य राज्ञः सा दत्ता वीरबाहोर् अहम् पुनः ।
त्वम् तु जाता मया दृष्टा दशार्णेषु पितुर् गृहे ॥ १५ ॥
यथै 'व ते पितुर् गेहन् तथै 'व मम भाविनि ।
यथै 'व च ममै 'श्वर्यन् दमयन्ति तथा तव ॥ १६ ॥
ताम् प्रहृष्टेन मनसा दमयन्ती विशाम् पते ।
प्रणम्य मातुर् भगिनीम् इदं वचनम् अब्रवीत् ॥ १७ ॥

---

13. flentes, illam amplexae, momentum quasi stabant. ॥ Oppressis lacrymis paulatim, regis-mater hoc dixit: । Sororis filia meae es, naevo
14. hoc praedita. ॥ Egoque tua materque regis illius magnanimi । filiae *sumus*, Dasârnorum-regnatoris Sudâmanis, pulchro-aspectu *prae-*
15. *dita!* ॥ Bhîmo regi illa data *est*, Vîravahui ego vero. । Tu verô nata
16. a me conspecta *es* in Dasârnis, in patris domo. ॥ Sicut sane tuo patri *est* domus, ita quoque mihi, eximia! । sicut etiamque mihi *est hoc*
17. dominium, Damayantia! ita tibi. ॥ Ei laetâ mente Damayantia, Visorum-domine! । postquam se inclinaverat, matris sorori hunc sermo-

अज्ञायमाना ऽपि सती सुखम् अस्म्य् उषिता त्वयि ।
सर्वकामैः सुविहिता रक्ष्यमाणा सदा त्वया ॥ १८ ॥
सुखात् सुखतरो वासो भविष्यति न संशयः ।
चिरविप्रोषिताम् मातर् माम् अनुज्ञातुम् अर्हसि ॥ १९ ॥
दारकौ च हि मे नीतौ वसतस् तत्र बालकौ ।
पित्रा विहीनौ शोकार्तौ मया चै ऽव कथन् नु तौ ॥ २० ॥
यदि चा ऽपि प्रियङ् किञ्चिन् मयि कर्तुम् इहे ऽच्छसि ।
विदर्भान् यातुम् इच्छामि शीघ्रम् मे यानम् आदिश ॥ २१ ॥
बाढम् इत्य् एव ताम् उक्त्वा हृष्टा मातृष्वसा नृप ।
गुप्ताम् बलेन महता पुत्रस्या ऽनुमते ततः ॥ २२ ॥
प्रास्थापयद् राजमाता श्रीमतीन् नरवाहिना ।

---

18. nem dixit: ‖ Incognita quoque dum eram, laete sum morata apud
19. te, | omnibus-optatis bene-instructa, custodita semper a te. ‖ Jucundâ jucundior habitatio erit, non dubium; | diu-exsulem, mater!
20. me dimittere velis. ‖ Liberi enim mei traducti habitant ibi parvuli, | patre orbati, moerore-afflicti, meque etiam quomodone ii (*sint or-*
21. *bati*)? ‖ Si vero carum quidpiam mihi facere hic vis, | in Vidarbhos
22. ire cupio, cito mihi vehiculum manda! ‖ «Ita;» sic nempe ad eam fata laeta matris-soror, rex! | custoditam ab exercitu magno, cum filii
23. assensu, tum ‖ misit regis-mater felicem, a viris-vecto | vehiculo,

यानेन भरतश्रेष्ठ स्वम् अन्नपानपरिच्छदाम् ॥ २३ ॥
ततः सा नचिराद् एव विदर्भान् अगमत् पुनः ।
तान् तु बन्धुजनः सर्वः प्रहृष्टः समपूजयत् ॥ २४ ॥
सर्वान् कुशलिनो दृष्ट्वा बान्धवान् दारकौ च तौ ।
मातरम् पितरञ् चोभौ सर्वञ् चैव सखीजनम् ॥ २५ ॥
देवताः पूजयामास ब्राह्मणांश् च यशस्विनी ।
परेण विधिना देवी दमयन्ती विशाम् पते ॥ २६ ॥
अतर्पयत् सुदेवञ् च गोसहस्रेण पार्थिवः ।
प्रीतो दृष्ट्वैव तनयाङ् ग्रामेण द्रविणेन च ॥ २७ ॥
सा व्युष्टा रजनीन् तत्र पितुर् वेश्मनि भामिनी ।
विश्रान्ता मातरं राजन्न् इदं वचनम् अब्रवीत् ॥ २८ ॥

---

24. Bharatorum-optime! cibo-potu-instructam. ‖ Deinde illa brevi quo-
que in Vidarbhos ivit rursus; | eam vero propinquorum-turba omnis
25. laeta honoravit. ‖ Omnes salvos tuita proquinquos, parvulosque illos, |
matrem patremque, ambos, totamque etiam amicarum-turbam, ‖
26. Deos coluit Brâhmanosque gloriosa, | eximio modo, regina Dama-
27. yantia, Visorum domine! ‖ Exhilaravit Sudêvumque vaccarum-mille
28. rex | laetus, tuitus nempe filiam, vico, opibusque. ‖ Illa, morata no-
ctem ibi in patris domo, egregia, | requieta matri, rex! hunc ser-

माञ् चेद् इच्छसि जीवन्तीम् मातः सत्यम् ब्रवीमि ते ।
नरवीरस्य चै ऽतस्य नलस्या ऽऽनयने यत ॥ २९ ॥
दमयन्त्या तथो ऽक्ता तु सा देवी भृशदुःखिता ।
बाष्पेण पिहिता राजन् नो ऽत्तरङ् किञ्चिद् अब्रवीत् ॥ ३० ॥
तदवस्थान् तु तान् दृष्ट्वा सर्वम् अन्तःपुरन् तदा ।
हाहाभूतम् अतीवा ऽऽसीद् भृशञ् च प्ररुरोद ह ॥ ३१ ॥
ततो भीमम् महाराजम् भार्या वचनम् अब्रवीत् ।
दमयन्ती तव सुता भर्तारम् अनुशोचति ॥ ३२ ॥
अपकृष्य च लज्जां सा स्वयम् उक्तवती नृप ।
प्रयतन्तु तव प्रेष्याः पुण्यश्लोकस्य मार्गणे ॥ ३३ ॥
तया प्रदेशितो राजा ब्राह्मणान् वशवर्तिनः ।

---

29. monem dixit: ॥ Me si cupis viventem, mater! veritatem dico tibi, ।
30. in virorum-herois etiam illius, Nali, adductione operam loca. ॥ A
Damayantiâ sic compellata vero illa regina, valde-afflicta, । lacrymis
31. obducta, rex! non responsum quodquam dixit. ॥ Tali-statu *affectam*
vero eam videns omne gynaeceum tunc, । heu!-heu!-clamans maxime
32. fuit, valdeque flevit. ॥ Deinde Bhîmo magno-regi uxor sermonem di-
33. xit: । Damayantia tua filia conjugem dolet, ॥ exutoque pudore, ea ipsa
fata *est,* rex: । «Operam locantô tui servi in Punyaslôci quaestione.» ॥
34. Ab illâ incitatus rex Brâhmanos voluntatem-agentes । misit plagas

प्रास्थापयद् दिशः सर्वा यतध्वन् नलमार्गणे ॥ ३४ ॥
ततो विदर्भाधिपतेर् नियोगाद् ब्राह्मणास् तदा ।
दमयन्तीम् अथो सृत्वा प्रस्थिताः स्मे 'त्य् अथा 'ब्रुवन् ॥ ३५ ॥
अथ तान् अब्रवीद् भैमी सर्वराष्ट्रेष्व् इदं वचः ।
ब्रूयास्त जनसंसत्सु तत्र तत्र पुनः पुनः ॥ ३६ ॥
क्व नु त्वं कितव छित्त्वा वस्त्रार्धम् प्रस्थितो मम ।
उत्सृज्य विपिने सुप्ताम् अनुरक्ताम् प्रियाम् प्रिय ॥ ३७ ॥
सा वै यथा समादिष्टा तथा 'स्ते त्वत्प्रतीक्षिणी ।
दह्यमाना भृशम् बाला वस्त्रार्धेना 'पि संवृता ॥ ३८ ॥
तस्या रुदन्त्याः सततन् तेन शोकेन पार्थिव ।
प्रसादङ् कुरु वै वीर प्रतिवाक्यं वदस्व च ॥ ३९ ॥

---

35. omnes versus: «Operam locate in Nali quaestione!» ‖ Deinde Vidar-
bhorum-regnatoris jussu Brâhmani tunc । Damayantiam etiam ag-
36. gressi, «proficiscentes sumus,» sic tunc dixerunt. ‖ Tum illis dixit
Bhaimia: In omnibus-regnis hunc sermonem । dicatis in hominum-
37. coetibus ubique iterum iterum: ‖ Quone tu, lusor! abscisso vestis-
dimidio profectus *es* meo, । relictâ in sylvâ dormiente, deditâ, amatâ,
38. o amate? ‖ Illa sane sicut jussa ita sedet te-exspectans, । usta valde
39. femina, vestis-dimidio quoque induta. ‖ Illi flenti semper ob hunc
moerorem, rex! । benevolentiam praesta, heros! responsum dicque. — ‖

एवम् अन्यच् च वक्तव्यङ् कृपाङ् कुर्याद् यथा मयि ।
वायुना धूयमानो हि वनन् दहति पावकः ॥४०॥
भर्तव्या रक्षणीया च पत्नी हि पतिना सदा ।
तन् नष्टम् उभयङ् कस्माद् धर्मज्ञस्य सतस् तव ॥४१॥
ख्यातः प्राज्ञः कुलीनश् च सानुक्रोशो भवान् सदा ।
संवृत्तो निरनुक्रोशः शङ्के मद्भाग्यसङ्क्षयात् ॥४२॥
तत् कुरुष्व नरव्याघ्र दयाम् मयि नरेश्वर ।
आनृशंस्यम् परो धर्मस् त्वत्त एव मया श्रुतम् ॥४३॥
एवम् ब्रुवाणान् यदि वः प्रतिब्रूयाद् धि कश्चन ।
स नरः सर्वथा ज्ञेयः कश् चासौ क्व च वर्तते ॥४४॥

---

40. Hoc aliudque *est* dicendum, misericordiam impertiatur ut mihi, |
41. a vento agitatus enim sylvam comburit ignis. — ‖ Sustentanda *est*
tuendaque conjux enim a conjuge semper; | hoc perditum utrum-
42. que cur, officiorum-gnarus *qui* es, tibi? ‖ Appellatus sapiens nobi-
lisque *et* misericors tu semper, | factus *es* expers-misericordiae;
43. suspicor, ob meae-fortunae-occasum; ‖ ideo impertire, homi-
num-princeps! misericordiam mihi, hominum-domine! | «Benigni-
44. tas *est* summum officium» e te sic a me *est* auditum. — ‖ Sic dicenti-
bus si vobis respondeat quispiam, | is Nalus, omnino cognoscen-
45. dus, et quis iste, et ubi versetur. ‖ Quique, hoc sermone audito,

यश् चै 'वं वचनं श्रुत्वा ब्रूयात् प्रतिवचो नरः ।
तद् आदाय वचस् तस्य ममा "वेद्यन् द्विजोत्तमाः ॥ ४५ ॥
यथा च वो न जानीयाद् ब्रुवतो मम शासनात् ।
पुनर् आगमनञ् चै 'व तथा कार्यम् अतन्द्रितैः ॥ ४६ ॥
यदिवा 'सौ समृद्धः स्याद् यदिवा 'प्य् अधनो भवेत् ।
यदिवा 'प्य् अर्थकामः स्यात् ज्ञेयन् तस्य चिकीर्षितम् ॥ ४७ ॥
एवम् उक्तास् त्व् अगच्छंस् ते ब्राह्मणाः सर्वतो दिशः ।
नलम् मृगयितुं राजंस् तदा व्यसनिनन् तथा ॥ ४८ ॥
ते पुराणि सराष्ट्राणि ग्रामान् घोषांस् तथा "श्रमान् ।
अन्वेषन्तो नलं राजन् ना 'धिजग्मुर् द्विजातयः ॥ ४९ ॥

---

dicat responsum vir, | iste, postquam perceptus erit, sermo ejus
46. mihi annuntiandus, Brâhmanorum-excellentissimi! || Utque vos non
cognoscat dicentes meo jussu, | rursus aditioque etiam (*ut sit*), sic
47. faciendum a non-cunctantibus. || Utrum ille opulentus sit, an pau-
per sit, | an divitiarum-cupidus sit, cognoscendum *est* ejus propo-
48. situm. || Sic compellati vero iverunt Brâhmani quoquoversus in
49. plagas, | Nalum quaesitum, rex! tunc aerumnosum, ita. || Ii op-
pida cum-regnis, vicos, pastorales sedes, ita anachoretarum sedes |
50. perquirentes, Nalum, rex! non adierunt Brâhmani. || Illumque

तच् च वाक्यन् तथा सर्वे तत्र तत्र विशाम् पते ।
श्रावयाञ्चक्रिरे विप्रा दमयन्त्या यथे "रितम् ॥ ५० ॥
॥ इति नलोपाख्याने सप्तदशः सर्गः ॥ १७ ॥

वृहदश्व उवाच

अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः ।
प्रत्येत्य नगरम् भैमीम् इदं वचनम् अब्रवीत् ॥ १ ॥
नैषधम् मृगयानेन दमयन्ति मया नलम् ।
अयोध्याम् नगरीं गत्वा भाङ्गासुरिर् उपस्थितः ॥ २ ॥
श्रावितश् च मया वाक्यन् त्वदीयं स महामते ।

---

sermonem ita cuncti ubique, Visorum domine! I audiendum curarunt Brâhmani, a Damayantiâ sicut emissus. II

## LIBER DUODEVICESIMUS.

Vrihadasvus dixit:

1. At post longum tempus Parnâdus nomine Brâhmanus, I postquam re-
2. dierat in urbem, Bhaimiae hunc sermonem dixit: II Naischadhum
quaerente, Damayantia! a me, Nalum, I in Ayodhyam urbem pro-
3. fecto, Bhângâsuris aditus, II audiens factusque a me sermonem tuum

ऋतुपर्णो महाभागो यथो ऽक्तं वरवर्णिनि ॥ ३ ॥
तच् छ्रुत्वा ना ऽब्रवीत् किञ्चिद् ऋतुपर्णो नराधिपः ।
न च पारिषदः कश्चिद् भाष्यमाणो मया ऽसकृत् ॥ ४ ॥
अनुज्ञातन् तु मां राज्ञा विजने कश्चिद् अब्रवीत् ।
ऋतुपर्णस्य पुरुषो बाहुको नाम नामतः ॥ ५ ॥
सूतस् तस्य नरेन्द्रस्य विरूपो ह्रस्वबाहुकः ।
शीघ्रयानेषु कुशलो मिष्टकर्ता च भोजने ॥ ६ ॥
स विनिश्वस्य बहुशो रुदित्वा च पुनः पुनः ।
कुशलञ् चै ऽव माम् पृष्ट्वा पश्चाद् इदम् अभाषत ॥ ७ ॥
वैषम्यम् अपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानम् आत्मना सत्यो जितस्वर्गा न संशयः ॥ ८ ॥

---

is, magna-mente praedita! | Rituparnus magnâ-fortunâ *praeditus*, si-
4. cut dictus, eximia! || Hoc audito, non dixit quidquam Rituparnus hominum-regnator, | neque e coetu quisquam, compellatus a me non
5. semel. || Dimissum vero me a rege, in experte-hominum *loco* quidam
6. allocutus est, | Rituparni homo, Vâhucus nempe nomine, || auriga illius hominum-regnatoris, deformis, brevibus-brachiis, | velocium-
7. cursuum peritus, suave-paransque in cibo. || Iste, postquam suspiraverat multum, fleveratque iterum iterum, | salutemque etiam me
8. postquam interrogaverat, deinde hoc dixit: || In miseriam quoque profectae custodiunt generosae-feminae | se per se, bonae, victum-

रहिता भर्तृभिश् चै 'व न क्रुध्यन्ति कदाचन ।
प्राणांश् चारित्रकवचान् धारयन्ति वरस्त्रियः ॥ ९ ॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत् सा तेन परित्यक्ता तत्र न क्रोद्धुम् अर्हति ॥ १० ॥
प्राणयात्राम् परिप्रेप्सोः शकुनैर् हृतवाससः ।
आधिभिर् दह्यमानस्य श्यामा न क्रोद्धुम् अर्हति ॥ ११ ॥
सत्कृता 'सत्कृता वा 'पि पतिन् दृष्ट्वा तथागतम् ।
भ्रष्टराज्यं श्रिया हीनङ् क्षुधितं व्यसनाप्लुतम् ॥ १२ ॥
तस्य तद् वचनं श्रुत्वा त्वरितो ऽहम् इहा 'गतः ।
श्रुत्वा प्रमाणम् भवती राज्ञश् चै 'व निवेदय ॥ १३ ॥
एतच् छ्रुत्वा 'श्रुपूर्णाक्षी पर्णादस्य विशाम् पते ।

---

9. coelum *habentes,* non dubium; ‖ desertae a conjugibusque etiam non irascuntur unquam, | vitam virtutis-loricâ *instructam* agunt eximiae-
10. feminae. ‖ Aerumnoso, stulto, lapsum-gaudium *habente*que, | quod
11. illa ab illo relicta, idcirco ne irasci velit. ‖ Vitae-victum desideranti, ab avibus captam-vestem *habenti* | sollicitudinibus usto nigra ne
12. irasci velit, ‖ bene-tractata, non-bene-tractatave, conjugem videns sic-aggressum, | lapsum-regnum *habentem,* felicitate orbatum, fame-
13. licum, calamitate-affectum. — ‖ Hujus hoc sermone audito, festinans ego huc aggressus. | Auditâ re arbitrium tu *es,* regi vero me-
14. mora. — ‖ Hoc postquam audierat, lacrymarum-plenis-oculis, e

दमयन्ती रहो ऽभ्येत्य मातरम् प्रत्यभाषत ॥ १४ ॥
अयम् अर्थो न संवेद्यो भीमे मातः कथञ्चन ।
त्वत्सन्निधौ नियोक्ष्ये ऽहं सुदेवन् द्विजसत्तमम् ॥ १५ ॥
यथा न नृपतिर् भीमः प्रतिपद्येत मे मतिम् ।
तथा त्वया प्रयत्तव्यम् मम चेत् प्रियम् इच्छसि ॥ १६ ॥
यथा चा ऽहं समानीता सुदेवेना ऽऽशु बान्धवान् ।
तेनै ऽव मङ्गलेना ऽऽशु सुदेवो यातु माचिरम् ॥ १७ ॥
समानेतुन् नलम् मातर् अयोध्यान् नगरीम् इतः ।
विश्रान्तन् तु ततः पश्चात् पर्णादन् द्विजसत्तमम् ॥ १८ ॥
अर्चयामास वैदर्भी धनेना ऽतीव भाविनी ।
नले चे ऽहा ऽऽगते विप्र भूयो दास्याम्य् अहं वसु ॥ १९ ॥

Parnâdo, Visorum domine! I Damayantia clam aggressa matrem allo-
15. cuta est: II Haec res non memoranda Bhîmo, mater! ullo modo; I in
16. tuâ praesentiâ instruam ego Sudêvum, Brâhmanorum-optimum; II ut
non regnator Bhîmus comperiat meum consilium, I sic tibi nitendum,
17. mihi si gratum cupis. II Sicutque ego adducta a Sudêvo cito ad pro-
18. pinquos, I eâdem sane fortunâ cito Sudêvus ito sine morâ, II adductum
Nalum, mater!, in Ayodhyam urbem hinc. I Requietum vero postea
19. Parnâdum, Brâhmanorum-optimum II coluit Vaidarbhia divitiis valde,
egregia: I «Nalo vero huc aggresso, Brâhmane! plus dabo ego di-

त्वया हि मे बहु कृतं यथा ना ऽन्यः करिष्यति ।
यद् भर्त्रा ऽहं समेष्यामि शीघ्रम् एव द्विजोत्तम ॥ २० ॥
एवम् उक्तो ऽर्चयित्वा ताम् आशीर्वादैः समङ्गलैः ।
गृहान् उपययौ चा ऽपि कृतार्थः सुमहामनाः ॥ २१ ॥
ततः सुदेवम् आभाष्य दमयन्ती युधिष्ठिर ।
अब्रवीत् सन्निधौ मातुर् दुःखशोकसमन्विता ॥ २२ ॥
गत्वा सुदेव नगरीम् अयोध्यावासिनन् नृपम् ।
ऋतुपर्णं वचो ब्रूहि सम्पतन्न् इव कामगः ॥ २३ ॥
आस्थास्यति पुनर् भैमी दमयन्ती स्वयंवरम् ।
तत्र गच्छन्ति राजानो राजपुत्राश् च सर्वशः ॥ २४ ॥
तथा च गणितः कालः श्वोभूते स भविष्यति ।

20. vitiarum. ‖ A te enim mihi multum factum, sicut non alius faciet, |
quod cum conjuge ego congrediar cito nempe, Brâhmanorum-excel-
21. lentissime!» ‖ Sic compellatus, postquam coluerat eam benedictionibus felicibus, | domicilia adiit, factâ-re, permagnâ-mente *praeditus*. ‖
22. Deinde Sudêvum alloquens Damayantia, Yudhishthire! | dixit in
23. praesentiâ matris, dolore-*et* moerore affecta: ‖ Profectus, Sudêve!
in urbem, Ayôdhyam-habitanti regnatori | Rituparno sermonem dic,
24. congrediens veluti ad arbitrium-iens: ‖ «Parabit iterum Bhaimia
Damayantia conjugis electionem; | illuc eunt reges regum-filiique
25. omnino. ‖ Sicque computatum *est* tempus: crastino *die*-facto, ea

यदि सम्भावनीयम् ते गच्छ शीघ्रम् अरिन्दम ॥ २५ ॥
सूर्योदये द्वितीयं सा भर्तारं वरयिष्यति ।
न हि स ज्ञायते वीरो नलो जीवति वा न वा ॥ २६ ॥
एवम् तया यथोक्तो वै गत्वा राजानम् अब्रवीत् ।
ऋतुपर्णम् महाराज सुदेवो ब्राह्मणस् तदा ॥ २७ ॥
॥ इति नलोपाख्याने अष्टादशः सर्गः ॥ १८ ॥

वृहदश्व उवाच

श्रुत्वा वचः सुदेवस्य ऋतुपर्णो नराधिपः ।
सान्त्वयन् श्लक्ष्णया वाचा वाहुकम् प्रत्यभाषत ॥ १ ॥

---

26. erit. I Si adeunda tibi, i cito, hostis-domitor! II Solis-ortu secundum illa conjugem eliget; I non enim ille noscitur heros Nalus, vi-
27. vatne, necne.» II Sic, ab illâ sicut jussus, profectus regi dixit I Rituparno, magne-rex! Sudêvus Brâhmanus tunc. II

## LIBER UNDEVICESIMUS.

Vrihadasvus dixit:

1. Postquam audierat sermonem Sudêvi Rituparnus hominum-regna-
2. tor, I blandiens suavi voce Vâhuco dixit: II Vidarbham ire cupio,

विदर्भां यातुम् इच्छामि दमयन्त्याः स्वयंवरम् ।
एकाह्ना हयतत्त्वज्ञ मन्यसे यदि बाहुक ॥ २ ॥
एवम् उक्तस्य कौन्तेय तेन राज्ञा नलस्य ह ।
व्यदीर्यत मनो दुःखात् प्रदध्यौ च महामनाः ॥ ३ ॥
दमयन्ती वदेद् एतत् कुर्याद् दुःखेन मोहिता ।
अस्मदर्थे भवेद् वा ऽयम् उपायश् चिन्तितो महान् ॥ ४ ॥
नृशंसं वत वैदर्भी कर्तुकामा तपस्विनी ।
मया क्षुद्रेण निकृता कृपणा पापबुद्धिना ॥ ५ ॥
स्त्रीस्वभावश् चलो लोके मम दोषश् च दारुणः ।
स्याद् एवम् अपि कुर्यात् सा विवासाद् गतसौहृदा ॥ ६ ॥
मम शोकेन संविग्ना नैराश्यात् तनुमध्यमा ।

---

ad Damayantiae conjugis electionem, I uno-die, equorum-scientiae-
3. gnare! si putas, Vâhuce! II Sic compellati, Cauntêye! ab illo rege
4. Nali I laceratum est cor moerore, cogitavitque magnanimus: II «Dama-
yantia dicat hoc, faciat dolore conturbata? I Meâ-causâ sitve hic dolus
5. excogitatus magnus? II Improbum, proh! Vaidarbhia faciendi-cupida
6. *est* pia, I a me vili offensa, miseranda, pravâ-mente *praedito?* II Femi-
narum-indoles mobilis *est* in mundo, meum vitiumque horrendum. I
7. Sit, ita quoque *ut* faciat illa exsilio expers-amicitiae, II meo moe-
rore perturbata, desperatione, tenui-medio *praedita.* — I Non sic ea

नै ’वं सा कर्हिचित् कुर्यात् सापत्या च विशेषतः ॥ ७ ॥
सत्यं यद् अत्रा ’सत्यं वा गत्वा वेत्स्यामि निश्चयम् ।
ऋतुपर्णस्य वै कामम् आत्मार्थञ् च करोम्य् अहम् ॥ ८ ॥
इति निश्चित्य मनसा वाहुको दीनमानसः ।
कृताञ्जलिर् उवाचे ’दम् ऋतुपर्णन् नराधिपम् ॥ ९ ॥
प्रतिजानामि ते वाक्यङ् गमिष्यामि नराधिप ।
एकाह्ना पुरुषव्याघ्र विदर्भनगरीन् नृप ॥ १० ॥
ततः परीक्षाम् अश्वानाञ् चक्रे राजन् स वाहुकः ।
अश्वशालाम् उपागम्य भाङ्गासुरिनृपाज्ञया ॥ ११ ॥
स त्वर्यमाणो वहुश ऋतुपर्णेन वाहुकः ।
अश्वान् जिज्ञासमानो वै विचार्य च पुनः पुनः ॥ १२ ॥

---

8. unquam faciat, cum-prole *quae est* etiam praesertim! — ‖ Verum quod in hoc, non-verumve, profectus cognoscam dijudicationem; |
9. Rituparni optatum meâ-causâque facio ego.» ‖ Sic postquam constituerat mente Vâhucus miserâ-mente, | implicitis manibus dixit hoc Ri-
10. tuparno hominum-regnatori: ‖ «Satisfacio tuo sermoui; ibo, hominum-regnator! | uno-die, hominum-princeps! Vidarbha-nagarim,
11. rex! ‖ «Deinde inspectionem equorum fecit, rex! ille Vâhucus, | equo-
12. rum-stabulum aggressus, Bhângâsuris-regis-jussu. ‖ Ille incitatus multum a Rituparno Vâhucus, | equos cognoscere cupiens postquam

अध्यगच्छत् कृशान् अश्वान् समर्थान् अध्वनि क्षमान् ।
तेजोबलसमायुक्तान् कुलशीलसमन्वितान् ॥ १३ ॥
वर्जिताँल् लक्षणैर् हीनैः पृथुप्रोथान् महाहनून् ।
शुद्धान् दशभिर् आवर्तैः सिन्धुजान् वातरंहसः ॥ १४ ॥
दृष्ट्वा तान् अब्रवीद् राजा किञ्चित् कोपसमन्वितः ।
किम् इदम् प्रार्थितङ् कर्तुम् प्रलब्धव्या न ते वयम् ॥ १५ ॥
कथम् अल्पबलप्राणा वक्ष्यन्ती 'मे हया मम ।
महदध्वानम् अपि च गन्तव्यङ् कथम् ईदृशैः ॥ १६ ॥

वाहुक उवाच

एको ललाटे द्वौ मूर्ध्नि द्वौ द्वौ पार्श्वोपपार्श्वयोः ।
द्वौ द्वौ वक्षसि विज्ञेयौ प्रयाणे चै 'क एव तु ॥ १७ ॥

---

13. perpenderatque iterum iterum, ‖ adiit macros equos, idoneos, in viâ-
14. potentes, | vi-*et* potestate-conjunctos, genere *et* virtute-praeditos, ‖ liberos a notis malis, ingentibus-nasis, magnis-maxillis, | puros a decem
15. notis *malis,* in Sindhue-natos, *sicut* ventus-veloces. ‖ Tuitus hos, dixit rex paululum irâ-affectus: | Quid hoc petitum *est* facere? Decipiendi
16. non tibi nos. ‖ Quomodo parvum-roboris-*et* halitus *habentes* vehent hi equi mei? | magnam-viam etiamque eundum *est* quomodo a talibus?

Vâhucus dixit:

17. Una in fronte, duae in capite, duae *et* duae in latere-*et* opposito latere, | duae *et* duae in pectore cognoscendae, in tergoque una sic

एते हया गमिष्यन्ति विदर्भान् ना ऽत्र संशयः ।
यान् अन्यान् मन्यसे राजन् ब्रूहि तान् योजयामि ते ॥१८॥

ऋतुपर्ण उवाच

त्वम् एव हयतत्त्वज्ञः कुशलो ह्य् असि वाहुक ।
यान् मन्यसे समर्थांस् त्वङ् क्षिप्रन् तान् एव योजय ॥१९॥

वृहदश्व उवाच

ततः सदश्वांश् चतुरः कुलशीलसमन्वितान् ।
योजयामास कुशलो जवयुक्तान् रथे नलः ॥२०॥
ततो युक्तं रथं राजा समारोहत् त्वरान्वितः ।
ततः पर्यपतन् भूमौ जानुभिस् ते हयोत्तमाः ॥२१॥
ततो नरवरः श्रीमान् नलो राजा विशाम् पते ।

---

18. etiam; ‖ hi equi ibunt in Vidarbhos, non in hoc dubium. | Quos alios putas, rex! dic; eos jungam tibi. ‖

Rituparnus dixit:

19. Tu ipse equorum-scientiae-gnarus, peritus es, Vâhuce! | Quos putas idoneos tu, cito eos ipsos junge. ‖

Vrihadasvus dixit:

20. Deinde bonos-equos quatuor, genere-*et* virtute-praeditos, | junxit
21. peritus velocitati-junctos currui Nalus. ‖ Deinde junctum currum rex ascendit festinatione-affectus, | tum ceciderunt humi genibus illi
22. equorum-excellentissimi. ‖ Deinde virorum-optimus, felix Nalus

सान्त्वयामास तान् अश्वांस् तेजोवलसमन्वितान् ॥ २२ ॥
रश्मिभिस् च समुद्यम्य नलो यातुम् इयेष सः ।
सूतम् आरोप्य वार्ष्णेयञ् जवम् आस्थाय वै परम् ॥ २३ ॥
ते नोद्यमाना विधिवद् वाहुकेन हयोत्तमाः ।
समुत्पेतुर् अथा ऽऽकाशं रथिनम् मोहयन्न् इव ॥ २४ ॥
तथा तु दृष्ट्वा तान् अश्वान् वहतो वातरंहसः ।
अयोध्याधिपतिः श्रीमान् विस्मयम् परमं ययौ ॥ २५ ॥
रथघोषन् तु तं श्रुत्वा हयसङ्ग्रहणञ् च तत् ।
वार्ष्णेयश् चिन्तयामास वाहुकस्य हयज्ञताम् ॥ २६ ॥
किन् नु स्यान् मातलिर् अयन् देवराजस्य सारथिः ।
तथा तल्लक्षणं वीरे वाहुके दृश्यते महत् ॥ २७ ॥

---

rex, Visorum domine! | blanditus est illis equis vi *et* potestate-prae-
23. ditis. || Habenisque postquam cohibuerat Nalus, ire cupivit is, | au-
rigam postquam ascendere fecerat Vârschnêyum, velocitatem efficiens
24. eximiam. || Illi incitati ad normam a Vâhuco equorum-excellentis-
25. simi | exsiluerunt tum in aërem, aurigam conturbantes quasi. || Sic
vero tuitus illos equos vehentes, *ut* ventum-veloces, | Ayôdhyae-
26. regnator felix admirationem summam adiit. || Currus-strepitumque
illum postquam perceperat, equorum rectionemque illam, | Vârshnêyus
27. reputavit Vâhuci equorum-scientiam: || «Anne sit Mâtalis hic, Deo-
rum-regis auriga? | sic illius-nota in heroë Vâhuco cernitur magna. ||

शालिहोत्रो ऽथ किन् नु स्याद् धयानाङ् कुलतत्त्ववित् ।
मानुष्यं समनुप्राप्तो वपुः परमशोभनम् ॥ २८ ॥
उताहोस्विद् भवेद् राजा नलः परपुरञ्जयः ।
सो ऽयन् नृपतिर् आयात इत्य् एव समचिन्तयत् ॥ २९ ॥
अथवा यान् नलो वेद विद्यान् ताम् एव वाहुकः ।
तुल्यं हि लक्षये ज्ञानं वाहुकस्य नलस्य च ॥ ३० ॥
अपि चे 'दं वयस् तुल्यं वाहुकस्य नलस्य च ।
ना 'यन् नलो महावीर्यस् तद्विद्यश् च भविष्यति ॥ ३१ ॥
प्रच्छन्ना हि महात्मानश् चरन्ति पृथिवीम् इमाम् ।
दैवेन विधिना युक्ताः प्रच्छन्नाश् चा 'पि रूपतः ॥ ३२ ॥
भवेन् न मतिभेदो मे गात्रवैरूप्यताम् प्रति ।

---

28. Sâlihôtrus anne sit equorum generis-*et* naturae-gnarus, | humanum
29. nactus corpus eximie-pulchrum? || An sit rex Nalus hostium-urbis-
expugnator, | is ille hominum-dominus aggressus?» Sic nempe cogi-
30. tavit; || «An, quam Nalus scit scientiam, eam etiam Vâhucus; |
31. aequalem enim conspicio notitiam Vâhuci Nalique: || etiamque haec
aetas aequalis Vâhuci Nalique. — | *Si* non hic Nalus magnâ-forti-
32. tudine, ejus-scientiam *habens* tamen erit; || occulti enim magnanimi
peragrant terram hanc, | divinae sorti juncti, occultique etiam for-
33. mâ. || Sit non opinionis-discrimen mihi? Corporis deformitatem circa |

प्रमाणात् परिहीनस् तु भवेद् इति मतिर् मम ॥ ३३ ॥
वयः प्रमाणन् तत् तुल्यं रूपेण तु विपर्ययः ।
नलं सर्वगुणैर् युक्तम् मन्ये वाहुकम् अन्ततः ॥ ३४ ॥
एवं विचार्य बहुशो वार्ष्णेयः पर्यचिन्तयत् ।
हृदयेन महाराज पुण्यश्लोकस्य सारथिः ॥ ३५ ॥
ऋतुपर्णस् तु राजेन्द्रो वाहुकस्य हयज्ञताम् ।
चिन्तयन् मुमुदे राजा सहवार्ष्णेयसारथिः ॥ ३६ ॥
ऐकाग्र्यञ् च यथोत्साहं हयसङ्ग्रहणे च तत् ।
परं यत्नञ् च सम्प्रेक्ष्य पराम् मुदम् अवाप ह ॥ ३७ ॥

॥ इति नलोपाख्याने नवदशः सर्गः ॥ १९ ॥

---

34. documento *est* privatus vero; sit ita opinio mea. ‖ Aetas *est* documentum; ea aequalis; formâ vero repugnantia. | Nalum omnibus-
35. virtutibus junctum puto Vâhucum denique. ‖ Sic, considerando multum, Vârschnêyus cogitavit | corde, magne-rex! Punyaslôci auriga. ‖
36. Rituparnus quoque regum-princeps, Vâhuci equorum-scientiam |
37. reputans, gavisus est rex, cum Vârshnêyo-aurigâ. ‖ Attentionemque secundum-potestatem in equorum-rectione nempe illam, | summum studiumque tuitus, summum-gaudium adeptus est. ‖

वृहदश्व उवाच

स नदीः पर्वतांश् चै 'व वनानि च सरांसि च ।
अचिरेणा 'तिचक्राम खेचरः खे चरन्न् इव ॥ १ ॥
तथा प्रयाते तु रथे तदा भाङ्गासुरिर् नृपः ।
उत्तरीयम् अधो ऽपश्यद् भ्रष्टम् परपुरञ्जयः ॥ २ ॥
ततः स त्वरमाणस् तु पटे निपतिते तदा ।
ग्रहीष्यामी 'ति तं राजा नलम् आह महामनाः ॥ ३ ॥
निगृह्णीष्व महाबुद्धे हयान् एतान् महाजवान् ।
वार्ष्णेयो यावद् एनम् मे पटम् आनयताम् इह ॥ ४ ॥
नलस् तम् प्रत्युवाचा 'थ दूरे भ्रष्टः पटस् तव ।
योजनं समतिक्रान्तो ना 'हर्तुं शक्यते पुनः ॥ ५ ॥

---

## LIBER VICESIMUS.

Vrihadasvus dixit:

1. Ille amnes montesque etiam, sylvasque lacusque I brevi praeteriit,
2. avis in aëre vadens veluti. II Sic progressoque curru tunc, Bhângâsuris rex I vestem superiorem deorsum vidit lapsam, hostium-urbis-ex-
3. pugnator. II Deinde ille festinans vero, veste delapsâ tunc, I «tollam,»
4. sic illi rex Nalo dixit magnanimus; II «retine, magnâ-mente *praedite!* equos hos magnâ-velocitate, I Vârshnêyus dum hanc meam vestem appor-
5. tat huc.» II Nalus illi respondit tum: Procul lapsa vestis tua, I *Yôdscha-*

एवम् उक्तो नलेना 'थ तदा भाङ्गासुरिर् नृपः ।
आससाद वने राजन् फलवन्तं विभीतकम् ॥ ६ ॥
तन् दृष्ट्वा वाहुकं राजा त्वरमाणो ऽभ्यभाषत ।
ममा 'पि सूत पश्य त्वं सङ्ख्याने परमम् बलम् ॥ ७ ॥
सर्वः सर्वन् न जानाति सर्वज्ञो ना 'स्ति कश्चन ।
नै 'कत्र परिनिष्ठा 'स्ति ज्ञानस्य पुरुषे क्वचित् ॥ ८ ॥
वृक्षे ऽस्मिन् यानि पर्णानि फलान्य् अपि च वाहुक ।
पतितानि च यान्य् अत्र तत्रै 'कम् अधिकं शतम् ॥ ९ ॥
एकम् अत्रा 'धिकम् पत्रम् फलम् एकञ् च वाहुक ।
पञ्च कोट्यो ऽथ पत्राणान् द्वयोर् अपि च शाखयोः ॥१०॥
प्रचिनुह्य् अस्य शाखे द्वे याश् चा 'प्य् अन्याः प्रशाखिकाः ।

---

6. *no* transita non afferri potest rursus. ॥ Sic compellatus a Nalo tunc Bhângâsuris regnator । accessit in sylvâ, rex! fructibus praeditum ad
7. *vibhîtacum.* ॥ Eum tuitus, Vâhucum rex festinans allocutus est: । Meam
8. quoque, auriga! vide tu in numeratione eximiam vim. ॥ Omnis omne non intelligit, omnia-sciens non est quisquam; । non in uno sedes est
9. scientiae homine unquam. ॥ In arbore hac quae folia, fructus etiamque, Vâhuce! । lapsaque quae hic, ibi unum super centum. ॥ Unum
10. ibi super folium, fructus unusque, Vâhuce! । Quinque *côtes* vero fo-
11. liorum in duobus etiamque ramis. ॥ Collige ejus ramos duos, et qui

आभ्याम् फलसहस्रे द्वे पञ्चोनं शतम् एव च ॥ ११ ॥
ततो रथम् अवस्थाप्य राजानं बाहुको ऽब्रवीत् ।
परोक्षम् इव मे राजन् कत्थसे शत्रुकर्षण ॥ १२ ॥
प्रत्यक्षम् एतत् कर्तास्मि शातयित्वा विभीतकम् ।
अथा 'त्र गणिते राजन् विद्यते न परोक्षता ॥ १३ ॥
प्रत्यक्षन् ते महाराज शातयिष्ये विभीतकम् ।
अहं हि ना 'भिजानामि भवेद् एवन् न वे 'ति च ॥ १४ ॥
सङ्ख्यास्यामि फलान्य् अस्य पश्यतस् ते जनाधिप ।
मुहूर्तम् अपि वार्ष्णेयो रश्मीन् यच्छतु वाजिनाम् ॥ १५ ॥
तम् अब्रवीन् नृपः सूतन् ना 'यं कालो विलम्बितुम् ।
बाहुकस् त्व् अब्रवीद् एनम् परं यत्नं समास्थितः ॥ १६ ॥

---

etiam alii *inter*medii-rami, | in iis duobus fructuum-millia duo, quin-
12. que-minus centum etiamque. — || Deinde, postquam currum reti-
nuerat, regi Vâhucus dixit: | Invisibile quasi mihi, rex! dicis, hostium-
13. vexator! || Visibile hoc faciam numerando *vibhîtacum;* | deinde, eo
14. numerato, rex! existit non invisibilitas. || In conspectu tuo, magne-
rex! numerabo *vibhîtacum;* | ego enim non scio, *utrum* sit ita, an non
15. ita quoque. || Numerabo fructus ejus, spectante te, hominum-reg-
nator! | Momentum modo Vârschnêyus habenas cohibeto equorum. — ||
16. Illi dixit regnator aurigae: Non id tempus *est* cunctandi. | Vâhucus

प्रतीक्षस्व मुहूर्त्तन् त्वम् अथ वा त्वरते भवान् ।
एष याति शिवः पन्था याहि वार्ष्णेयसारथिः ॥ १७ ॥
अब्रवीद् ऋतुपर्णस् तु सान्त्वयन् कुरुनन्दन ।
त्वम् इव यन्ता ना ऽन्यो ऽस्ति पृथिव्याम् अपि वाहुक ॥ १८ ॥
त्वत्कृते यातुम् इच्छामि विदर्भान् हयकोविद ।
शरणन् त्वाम् प्रपन्नो ऽस्मि न विघ्नङ् कर्तुम् अर्हसि ॥ १९ ॥
कामञ् च ते करिष्यामि यन् मां वक्ष्यसि वाहुक ।
विदर्भान् यदि यात्वा ऽद्य सूर्यन् दर्शयितासि मे ॥ २० ॥
अथा ऽब्रवीद् वाहुकस् तं सङ्ख्याय च विभीतकम् ।
ततो विदर्भान् यास्यामि कुरुष्वै ऽवं वचो मम ॥ २१ ॥
अकाम इव तं राजा गणयस्वे ऽत्य् उवाच ह ।

---

17. vero dixit ei, summum studium aggressus: ‖ Exspecta momentum tu; aut, festinas tu, | haec it recta via, i Vârshnêyum-aurigam *habens*. ‖
18. Dixit Rituparnus vero blandiens, o Curuis-proles: | Tu sicut auriga
19. non alius est in terrâ quidem, Vâhuce! ‖ Tuâ-causâ ire cupio in Vidarbhos, equorum-gnare! | in refugium ad te profectus sum, ne in-
20. terruptionem facere velis. ‖ Libenterque tibi faciam, quod mihi dices, Vâhuce! | in Vidarbhos, si, postquam venerimus hodie, solem
21. ostendes mihi. ‖ At dixit Vâhucus illi: Postquam numeravero nempe *vibhîtacum*, | tum in Vidarbhos ibo; perfice ita sermonem meum. ‖
22. Invitus quasi ei rex, numera, sic dixit, | unum-locum nempe rami

एकदेशञ् च शाखायाः समादिष्टम् मया ऽनघ ॥२२॥
गणयस्वा ऽस्य तत्त्वज्ञ ततस् त्वम् प्रीतिम् आवह ।
सो ऽवतीर्य रथात् तूर्णं गणयामास तन् द्रुमम् ॥२३॥
ततः स विस्मयाविष्टो राजानम् इदम् अब्रवीत् ।
गणयित्वा यथो ऽक्तानि तावन्त्य् एव फलानि तु ॥२४॥
अत्यद्भुतम् इदं राजन् दृष्टवान् अस्मि ते बलम् ।
श्रोतुम् इच्छामि तां विद्यां ययै ऽतज् ज्ञायते नृप ॥२५॥
तम् उवाच ततो राजा त्वरितो गमने नृपः ।
विद्ध्य् अक्षहृदयज्ञम् मां सङ्ख्याने च विशारदम् ॥२६॥
वाहुकस् तम् उवाचा ऽथ देहि विद्याम् इमाम् मम ।
मत्तो ऽपि चा ऽश्वहृदयङ् गृहाण पुरुषर्षभ ॥२७॥

---

23. monstratum a me, expers-peccatorum! II numera hujus (vibhitaci), veritatis-gnare! inde tu gaudium adduc. I Ille, postquam descenderat
24. de curru cito, numeravit illam arborem. II Deinde is, admiratione-captus, regi hoc dixit, I postquam numeraverat: Sicut dicti, tot sane
25. fructus etiam. II Permiram hanc, rex! tuitus sum tuam vim. I Audire
26. cupio illam scientiam, quâ hoc noscitur, regnator! II Ei dixit tum rex festinans in itinere regnator: I Scito talorum-scientiae-gnarum me,
27. numerationisque peritum. II Vâhucus ei dixit tum: Da scientiam hanc mihi, I a me etiamque equorum-scientiam cape, hominum-princeps! II

ऋतुपर्णस् ततो राजा वाहुकङ् कार्यगौरवात् ।
हयज्ञानस्य लोभाच् च तथे 'त्य् एवा 'ब्रवीद् वचः ॥ २८ ॥
यथोक्तान् त्वङ् गृहाणे 'दम् अक्षाणां हृदयम् परम् ।
निक्षेपो मे ऽश्वहृदयन् त्वयि तिष्ठति वाहुक ॥ २९ ॥
एवम् उक्त्वा ददौ विद्याम् ऋतुपर्णो नलाय वै ।
तस्या 'क्षहृदयज्ञस्य शरीरान् निःसृतः कलिः ।
कर्कोटकविषन् तीक्ष्णम् मुखात् सततम् उद्वमन् ॥ ३० ॥
कलेस् तस्य तदा ''र्तस्य शापाग्निः स विनिःसृतः ।
स तेन कर्शितो राजा दीर्घकालम् अनात्मवान् ॥ ३१ ॥
ततो विषविमुक्तात्मा स्वं रूपम् अकरोत् कलिः ।
तं शप्तुम् ऐच्छत् कुपितो निषधाधिपतिर् नलः ॥ ३२ ॥

---

28. Rituparnus tum rex Vâhuco, propter negotii-gravitatem, | equorum-
29. scientiae cupiditatemque, «ita,» sic nempe dixit sermonem, ‖ sicut-
dictum, tu cape hanc talorum scientiam eximiam, | compensatio mea
30. equorum-scientia in te est, Vâhuce! ‖ Sic fatus, dedit scientiam Rituparnus Nalo. | Hujus talorum-scientiae-gnari e corpore egressus *est* Calis, | Carcôtaci-venenum acre ex ore perpetuo evomens. ‖
31. Calis hujus tum afflicti exsecrationis-ignis ille egressus *est*: | ille hoc
32. attenuatus *est* rex longum-tempus non-sui compos. ‖ Deinde veneno-
solutus propriam suam formam fecit Calis; | eum exsecrari voluit ira-

तम् उवाच कलिर् भीतो वेपमानः कृताञ्जलिः ।
कोपं संयच्छ नृपते कीर्त्तिन् दास्यामि ते पराम् ॥ ३३ ॥
इन्द्रसेनस्य जननी कुपिता मा ऽशपत् पुरा ।
यदा त्वया परित्यक्ता ततो ऽहम् भृशपीडितः ॥ ३४ ॥
अवसन् त्वयि राजेन्द्र सुदुःखम् अपराजित ।
विषेण नागराजस्य दह्यमानो दिवानिशम् ॥ ३५ ॥
शरणन् त्वाम् प्रपन्नो ऽस्मि शृणु चे ऽदं वचो मम ।
ये च त्वाम् मनुजा लोके कीर्त्तयिष्यन्त्य् अतन्द्रिताः ॥ ३६ ॥
मत्प्रसूतम् भयन् तेषान् न कदाचिद् भविष्यति ।
भयार्त्तं शरणं यातं यदि मान् त्वन् न शप्स्यसे ॥ ३७ ॥
एवम् उक्तो नलो राजा न्ययच्छत् कोपम् आत्मनः ।

---

33. tus Nischadhorum-regnator Nalus. ‖ Isti dixit Calis, timidus, tremens, implicitis manibus: | Iram cohibe, hominum-domine! gloriam
34. dabo tibi eximiam. ‖ Indrasêni genitrix irata me exsecrata est antea, |
35. quando a te deserta; ex hoc *tempore* ego valde-afflictus ‖ habitavi in te, hominum-princeps! perdolorose, invicte! | Veueno serpentum-
36. regis ustus die-*et* nocte. ‖ In refugium ad te profectus sum, audi hunc sermonem meum: | quicunque te homiues in mundo celebrabunt non-
37. negligentes, ‖ e me-progenitus timor his non unquam erit, | timore-
38. afflictum, in refugium profectum, si me tu non exsecraberis. ‖ Sic

ततो भीतः कलिः क्षिप्रम् प्रविवेश विभीतकम् ॥ ३८ ॥
कलिस् त्व् अन्यैस् तदा ऽदृश्यः कथयन् नैषधेन वै ।
ततो गतज्वरो राजा नैषधः परवीरहा ॥ ३९ ॥
सम्प्रणष्टे कलौ राजन् सङ्ख्याय च फलान्य् उत ।
मुदा परमया युक्तस् तेजसा ऽथ परेण च ॥ ४० ॥
रथम् आरुह्य तेजस्वी प्रययौ जवनैर् हयैः ।
विभीतकश् चा ऽप्रशस्तः संवृत्तः कलिसंश्रयात् ॥ ४१ ॥
हयोत्तमान् उत्पततो द्विजान् इव पुनः पुनः ।
नलः सञ्चोदयामास प्रहृष्टेना ऽन्तरात्मना ॥ ४२ ॥
विदर्भाभिमुखो राजा प्रययौ स महायशाः ।
नले तु समतिक्रान्ते कलिर् अप्य् अगमद् गृहम् ॥ ४३ ॥

---

compellatus Nalus rex, oppressit iram suam; | deinde timidus Calis cito
39. intravit *vibhîtacum.* || Calis verô aliis tunc invisibilis *erat* loquens cum
Naischadho. | Deinde remotam-difficultatem *habens* rex Naischadhus
40. hostium-heroum-occisor, || postquam evanuerat Calis, rex! numera-
41. tisque fructibus, | gaudio eximio junctus, splendore eximioque, || cur-
rum postquam ascenderat splendidus, processit velocibus equis. | *Vi-*
42. *bhîtacus* vero infamis factus ob Calis-accessum. || Equorum-excel-
lentissimos, evolantes aves veluti iterum iterum, | Nalus impulit laeto
43. animo. || Ad Vidharbos-converso-ore rex processit ille magnâ-glo-
44. riâ; | Naloque progresso, Calis quoque ivit domum. || Deinde re-

ततो गतज्वरो राजा नलो ऽभूत् पृथिवीपतिः ।
विमुक्तः कलिना राजन् रूपमात्रवियोजितः ॥ ४४ ॥

॥ इति नलोपाख्याने विंशतितमः सर्गः ॥ २० ॥

बृहदश्व उवाच

ततो विदर्भान् सम्प्राप्तं सायाह्ने सत्यविक्रमम् ।
ऋतुपर्णञ् जना राज्ञे भीमाय प्रत्यवेदयन् ॥ १ ॥
स भीमवचनाद् राजा कुण्डिनम् प्राविशत् पुरम् ।
नादयन् रथघोषेण सर्वाः सविदिशो दिशः ॥ २ ॥
ततस् तं रथनिर्घोषन् नलाश्वास् तत्र शुश्रुवुः ।

---

motam-difficultatem-habens Nalus erat terrae-dominus, I solutus Cale, rex, a formâ solum-disjunctus. II

## LIBER VICESIMUS PRIMUS.

Vrihadasvus dixit:

1. Deinde in Vidarbhos profectum, vespere, verâ-vi I Rituparnum, ho-
2. mines regi Bhîmo annuntiarunt. II Is Bhîmi-dicto rex Cundinum in-
travit urbem, I sonantes faciens currus-sonitu omnes cum-intermediis
3. regionibus plagas. II Deinde hunc currus-strepitum Nali-equi ibi

श्रुत्वा तु समाहृष्यन्त पुरे 'व नलसन्निधौ ॥ ३ ॥
दमयन्ती तु शुश्राव रथघोषन् नलस्य तम् ।
यथा मेघस्य नदतो गम्भीरञ् जलदागमे ॥ ४ ॥
परं विस्मयम् आपन्ना श्रुत्वा नादम् महास्वनम् ।
नलेन सङ्गृहीतेषु पुरे 'व नलवाजिषु ॥ ५ ॥
सदृशं हयनिर्घोषम् मेने भैमी तथा हयाः ।
प्रासादस्थाश् च शिखिनः शालास्थाश् चै 'व वारणाः ।
हयाश् च शुश्रुवुस् तस्य रथघोषम् महीपतेः ॥ ६ ॥
तच् छ्रुत्वा रथनिर्घोषं वारणाः शिखिनस् तथा ।
प्रणेदुर् उन्मुखा राजन् मेघनाद इवो 'त्सुकाः ॥ ७ ॥

---

audierunt, I audiendo verum gavisi sunt, antea veluti in Nali-
4. praesentiâ. II Damayantia quoque audivit currus-strepitum Nali
5. hunc, I sicut nubis tonantis profundum in nubis-aditu. II Summam
admirationem aggressa *est* audiendo strepitum magno-sono, I a
6. Nalo rectis antea veluti Nali-equis. II Similem equorum-strepitum
putabat Bhaimia, ita equi; I in palatio-versantesque pavones, in sta-
bulo-versantesque etiam elephanti, I equique audiebant illius cur-
7. rus-strepitum terrae-domini. II Hoc audito currus-strepitu, ele-
phanti, pavones ita, I clamarunt erectis-oribus, rex! inter nubis-
sonitum veluti gaudentes. II

दमयन्त्य् उवाच

यथा 'सौ रथनिर्घोषः पूरयन्न् इव मेदिनीम् ।
ममा ''ह्लादयते चेतो नल एष महीपतिः ॥ ८ ॥
अद्य चन्द्राभवक्त्रान् तन् न पश्यामि नलं यदि ।
असङ्ख्येयगुणं वीरं विनङ्क्ष्यामि न संशयः ॥ ९ ॥
यदि चै 'तस्य वीरस्य बाह्वोर् ना 'द्या 'हम् अन्तरम् ।
प्रविशामि सुखस्पर्शन् न भविष्याम्य् असंशयम् ॥ १० ॥
यदि माम् मेघनिर्घोषो नो 'पगच्छति नैषधः ।
अद्य चामीकरप्रख्यम् प्रवेक्ष्यामि हुताशनम् ॥ ११ ॥
यदि मां सिंहविक्रान्तो मत्तवारणविक्रमः ।
ना 'भिगच्छति राजेन्द्रो विनङ्क्ष्यामि न संशयः ॥ १२ ॥

---

Damayantia dixit:

8. Quam hic currus-strepitus, implens quasi terram, | meam oblectat
9. mentem! Nalus *est* hic terrae-dominus. || Hodie lunae-simili-ore il-
lum si non video Nalum, | innumerabilibus-virtutibus heroëm, peribo,
10. non dubium. || Sique illius herois brachiorum non hodie ego medium |
11. ineo jucundum-contactum habens, non vivam sine-dubio. || Si ad me
nubis-strepitu *praeditus* non accedit Naischadhus | hodie, auro-similem
12. intrabo ignem. || Si ad me *sicut* leo-validus, ebrii-elephanti-vi *prae-*
13. *ditus* | non accedit regum-princeps, peribo, non dubium. || Non

न स्मराम्य् अनृतङ् किञ्चिन् न स्मराम्य् अपकारताम् ।
न च पर्युषितं वाक्यं स्वैरेष्व् अपि कदाचन ॥ १३ ॥
प्रभुः क्षमावान् वीरश् च दाता चाऽभ्यधिको नृपैः ।
रहो ऽनीचानुवर्त्ती च क्लीववन् मम नैषधः ॥ १४ ॥
गुणांस् तस्य स्मरन्त्या मे तत्पराया दिवानिशम् ।
हृदयन् दीर्यत इदं शोकात् प्रियविनाकृतम् ॥ १५ ॥
एवं विलपमाना सा नष्टसञ्ज्ञे ऽव भारत ।
आरुरोह महद् वेश्म पुण्यश्लोकदिदृक्षया ॥ १६ ॥
ततो मध्यमकक्षायान् ददर्श रथम् आस्थितम् ।
ऋतुपर्णम् महीपालं सहवार्ष्णेयवाहुकम् ॥ १७ ॥
ततो ऽवतीर्य वार्ष्णेयो वाहुकश् च रथोत्तमात् ।

---

recordor mendacium ullum, non recordor offensionem, | neque va-
14. num sermonem in liberis quoque *rebus* unquam. ‖ Excelsus, patiens,
herosque, datorque superior regibus, | secreto non-humile-sequens,
15. eunuchi-instar, meus Naischadhus, ‖ virtutes ejus recordantis mei,
ei-addictae die-nocte, | cor laceratur id moerore, amato-privatum. ‖
16. Sic lamentans illa perditâ-mente quasi, Bhârate! | ascendit altum
17. domum Punyaslôcum-videndi cupiditate. ‖ Hinc in medio-septo vi-
dit, qui currum adscenderat, | Rituparnum terrae-dominum cum Vâr-
18. schnêyo-*et* Vâhuco. ‖ Deinde, postquam descenderant Vârschnêyus

हयांस् तान् अवमुच्या 'थ स्थापयामास वै रथम् ॥१८॥
सो ऽवतीर्य रथोपस्थाद् ऋतुपर्णो नराधिपः ।
उपतस्थे महाराजम् भीमम् भीमपराक्रमम् ॥१९॥
तम् भीमः प्रतिजग्राह पूजया परया ततः ।
अकस्मात् सहसा प्राप्तं स्त्रीमन्त्रन् न स्म विन्दति ॥२०॥
किङ् कार्यं स्वागतन् ते ऽस्तु राज्ञा पृष्टः स भारत ।
ना 'भिजज्ञे स नृपतिर् दुहित्रर्थे समागतम् ॥२१॥
ऋतुपर्णो ऽपि राजा स धीमान् सत्यपराक्रमः ।
राजानं राजपुत्रं वा न स्म पश्यति कञ्चन ॥२२॥
नै 'व स्वयंवरकथान् न च विप्रसमागमम् ।
ततो विगणयन् राजा मनसा कोशलाधिपः ॥२३॥

---

Vâhucusque de curruum-excellentissimo, | equis illis abjunctis tum,
19. collocavit currum (*Vâhucus*). || Ille postquam descenderat de currus-
sede Rituparnus hominum-regnator, | adiit magnum-regem Bhîmum
20. timendâ-vi. || Eum Bhîmus excepit cum honore summo tum; | sine-
21. causâ celeriter aggressum *esse* fortunatum non putavit. || «Quid *est*
faciendum? Prosper tibi adventus esto!» a rege interrogatus *est* ille,
Bhârate! | Non cognovit iste hominum-dominus filiae causâ *illum*
22. *esse* aggressum. || Rituparnus vero rex ille sapiens, verâ-vi *praeditus*, |
23. regem regis-filiumve non videbat quemquam; || non etiam mariti
electionis-indictionem, neque Brâhmanorum-congressum. | Deinde

आगतो ऽस्मी ’त्य् उवाचै ’नम् भवन्तम् अभिवादकः ।
राजा ’पि च स्मयन् भीमो मनसा समचिन्तयत् ॥ २४ ॥
अधिकं योजनशतन् तस्या ’’गमनकारणम् ।
ग्रामान् बहून् अतिक्रम्य ना ’भ्यगच्छद् यथातथम् ॥ २५ ॥
अल्पकार्यं विनिर्दिष्टन् तस्या ’’गमनकारणम् ।
पश्चाद् उदर्के ज्ञास्यामि कारणं यद् भविष्यति ॥ २६ ॥
नै ’तद् एवं स नृपतिस् तं सत्कृत्य व्यसर्जयत् ।
विश्राम्यताम् इत्य् उवाच क्लान्तो ऽसी ’ति पुनः पुनः ॥ २७ ॥
स सत्कृतः प्रहृष्टात्मा प्रीतः प्रीतेन पार्थिवः ।
राजप्रेष्यैर् अनुगतो दिष्टं वेश्म समाविशत् ॥ २८ ॥
ऋतुपर्णे गते राजन् वार्ष्णेयसहिते नृपे ।

---

24. considerans rex mente, Côsalorum-dominus; ‖ aggressus sum, sic dixit illi, te salutaturus. | Rex vero subridens Bhîmus mente consideravit ‖
25. super *yôdschana* centum ejus accessus-causam: | «Vicos multos trans-
26. gressus non advenit idcirco; ‖ parvi-momenti indicata ejus accessus-
27. causa. | Postea, futuro tempore, cognoscam, causa quae erit, ‖ non nunc. Sic (cogitans) hic rex, illum, postquam refecerat *eum*, dimisit. |
28. Requiescatur, sic dixit, defessus es, sic iterum iterum. ‖ Ille refectus laetam-mentem *habens*, exhilaratus ab exhilarato rex, | regis-famulis
29. comitatus, monstratam domum intravit. — ‖ Rituparno profecto, rex!

वाहुको रथम् आदाय रथशालाम् उपागमत् ॥ २९ ॥
स मोचयित्वा तान् अश्वान् उपचर्य च शास्त्रतः ।
स्वयं चै 'तान् समाश्वास्य रथोपस्थ उपाविशत् ॥ ३० ॥
दमयन्ती तु शोकार्ता दृष्ट्वा भाङ्गासुरिन् नृपम् ।
सूतपुत्रञ् च वार्ष्णेयं वाहुकञ् च तथाविधम् ॥ ३१ ॥
चिन्तयामास वैदर्भी कस्यै 'ष रथनिस्वनः ।
नलस्ये 'व महान् आसीन् न च पश्यामि नैषधम् ॥ ३२ ॥
वार्ष्णेयेन भवेन् नूनं विद्या सै 'वो 'पशिक्षिता ।
तेना 'द्य रथनिर्घोषो नलस्ये 'व महान् अभूत् ॥ ३३ ॥
आहोस्विद् ऋतुपर्णो ऽपि यथा राजा नलस् तथा ।
तथा 'यं रथनिर्घोषो नैषधस्ये 'व लक्ष्यते ॥ ३४ ॥

---

Vârschnêyo-comitato rege, | Vâhucus, curru capto, curruum-rece-
30. ptaculum adiit. || Is, postquam disjunxerat illos equos, curaveratque e
31. scientiâ, | ipseque iis blanditus, in currus-sede consedit. || Dama-
yantia vero moerore-afflicta, tuita Bhângâsurem regem, | aurigae-
32. filiumque Vârschnêyum, Vâhucumque talem, || cogitavit Vaidarbhia:
Cujus ille currus-sonitus? | Nali veluti magnus fuit, non tamen video
33. Naischadhum. || A Vârschnêyo sit certe scientia illa quoque cognita, |
34. ideo hodie currus-strepitus Nali veluti magnus fuit. || Fortasse Ritu-
parnus quoque *est* sicut rex Nalus ita; | itaque hic currus-strepitus

एवं सा तर्कयित्वा तु दमयन्ती विशाम् पते ।
दूतीम् प्रस्थापयामास नैषधान्वेषणे शुभाम् ॥ ३५ ॥
॥ इति नलोपाख्याने एकविंशतितमः सर्गः ॥ २१ ॥

दमयन्त्य् उवाच
गच्छ केशिनि जानीहि क एष रथवाहकः ।
उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः ॥ १ ॥
अभ्येत्य कुशलम् भद्रे मृदुपूर्वं समाहिता ।
पृच्छेथाः पुरुषं ह्य् एनं यथातत्त्वम् अनिन्दिते ॥ २ ॥

---

35. Naischadhi veluti videtur. — ॥ Sic illa postquam consideraverat Damayantia, Visorum domine! । nuntiam misit ad Naischadhum inquirendum pulchram. ॥

## LIBER VICESIMUS SECUNDUS.

Damayantia dixit:

1. I, Cêsinia! cognosce, quis hic auriga । sedens in currus-sede, defor-
2. mis, brevibus-brachiis. ॥ Aggressa salutem, beata! mitis-exordii studiosa, । interroges virum hunc, secundum-veritatem, non-spreta! ॥

अत्र मे महती शङ्का भवेद् एष नलो नृपः ।
यथा च मनसस् तुष्टिर् हृदयस्य च निर्वृतिः ॥ ३ ॥
ब्रूयाश् चै 'नङ् कथान्ते त्वम् पर्णादवचनं यथा ।
प्रतिवाक्यञ् च सुश्रोणि बुध्येथास् त्वम् अनिन्दिते ॥ ४ ॥

बृहदश्व उवाच

ततः समाहिता गत्वा दूती बाहुकम् अब्रवीत् ।
दमयन्त्य् अपि कल्याणी प्रासादस्था ह्य् उपैक्षत ॥ ५ ॥

केशिन्य् उवाच

स्वागतन् ते मनुष्येन्द्र कुशलन् ते ब्रवीम्य् अहम् ।
दमयन्त्या वचः साधु निबोध पुरुषर्षभ ॥ ६ ॥

---

3. Heic mihi magna *est* dubitatio: sit iste Nalus rex, | sicut *est* animi
4. *mei* voluptas cordisque laetitia. || Dicasque ei in conversationis-fine tu, Parnâdi-sermo sicut, | responsumque, pulchris-femoribus *praedita!* noscas tu, non-spreta! ||

Vrihadasvus dixit:

5. Deinde studiosa profecta, nuntia Vâhuco dixit; | Damayantia vero eximia, in palatii-suprema parte-stans, spectabat. ||

Câsinia dixit:

6. Felix adventus tibi *esto,* hominum-regnator! salutem tibi dico ego. | Damayantiae sermonem, age! cognosce, hominum-princeps: ||

कदा वै प्रस्थिता यूयङ् किमर्थम् इह चा ऽऽगताः ।
तत् त्वम् ब्रूहि यथान्यायं वैदर्भी श्रोतुम् इच्छति ॥ ७ ॥

वाहुक उवाच

श्रुतः स्वयंवरो राज्ञा कौशल्येन महात्मना ।
द्वितीयो दमयन्त्या वै भविता श्व इति द्विजात् ॥ ८ ॥
श्रुत्वै ऽतत् प्रस्थितो राजा शतयोजनयायिभिः ।
हयैर् वातजवैर् मुख्यैर् अहम् अप्य् अस्य सारथिः ॥ ९ ॥

केशिन्य् उवाच

अथो यो ऽसौ तृतीयो वः स कुतः कस्य वा पुनः ।
त्वञ् च कस्य कथञ् चे ऽदन् त्वयि कर्म समाहितम् ॥ १० ॥

---

7. Quando profecti *estis* vos, quamobrem hucque aggressi? I hoc tu dic, sicut-convenientia; Vaidarbhia audire cupit. II

Vâhucus dixit:

8. Audita *est* conjugis electio a rege Causalyo magnanimo I altera
9. Damayantiae; «erit cras;» sic, e Brâhmano. II Audito hoc, profectus *est* rex centum-*yôdschana*-euntibus I equis, *ut* ventus-velocibus, praecipuis; ego vero ejus *sum* auriga. II

Cêsinia dixit:

10. At qui ille tertius vestrum, is unde, cujusve etiam? I tuque cujus, quomodoque hoc tibi negotium impositum? II

वाहुक उवाच

पुण्यश्लोकस्य वै सूतो वार्ष्णेय इति विश्रुतः ।
स नले प्रद्रुते भद्रे भाङ्गासुरिम् उपस्थितः ॥ ११ ॥
अहम् अप्य् अश्वकुशलः सूतत्वे च प्रतिष्ठितः ।
ऋतुपर्णेन सारथ्ये भोजने च वृतः स्वयम् ॥ १२ ॥

केशिन्य् उवाच

अथ जानाति वार्ष्णेयः क्व नु राजा नलो गतः ।
कथञ् च त्वयि चै 'तेन कथितं स्यात् तु वाहुक ॥ १३ ॥

वाहुक उवाच

इहै 'व पुत्रौ निक्षिप्य नलस्या 'शुभकर्मणः ।

---

Vâhucus dixit:

11. Punyaslôci auriga, Vârschnêyus, sic celebratus; | hic, Nalus post-
12. quam aufugerat, eximia! Bhângâsurem aggressus *est.* || Ego vero equorum-gnarus, in aurigationeque celeber, | a Rituparno ad aurigationem cibumque *parandum* electus *sum* ipse. ||

Cêsinia dixit:

13. At scit Vârschnêyus, quone rex Nalus profectus? | Quomodoque tibi etiam ab illo narratum est, Vâhuce? ||

Vâhucus dixit:

14. Heic nempe pueris traditis Nali infaustum-factum *habentis* | pro-

गतस् ततो यथाकामन् नै 'व जानाति नैषधम् ॥ १४ ॥
न चा 'न्यः पुरुषः कश्चिन् नलं वेत्ति यशस्विनि ।
गूढश् चरति लोके ऽस्मिन् नष्टरूपो महीपतिः ॥ १५ ॥
आत्मै 'व तु नलं वेत्ति या चा 'स्य तदनन्तरा ।
न हि वै स्वानि लिङ्गानि नलः शंसति कर्हिचित् ॥ १६ ॥

केशिन्य् उवाच

यो ऽसाव् अयोध्याम् प्रथमङ् गतवान् ब्राह्मणस् तदा ।
इमानि नारीवाक्यानि कथयानः पुनः पुनः ॥ १७ ॥
क्व नु त्वङ् कितव च्छित्वा वस्त्रार्धम् प्रस्थितो मम ।
उत्सृज्य विपिने सुप्ताम् अनुरक्ताम् प्रियाम् प्रिय ॥ १८ ॥
सा वै यथा समादिष्टा तथा ''स्ते त्वत्प्रतीक्षिणी ।

---

15. fectus *est* hinc ad-libidinem; non iste scit de Naischadho, ǁ neque alius homo quisquam de Nalo scit, gloriosa! | Occultus peregrinatur
16. in mundo hoc perditam-formam *habens* terrae-dominus. ǁ Ipse tantum de Nalo scit, et quae ipsius-proxima; | non enim sua signa Nalus indicat unquam. ǁ

Cêsinia dixit:

17. Qui ille Ayôdhyam primum profectus Brâhmanus tunc, | haec fe-
18. minae-dicta dicens iterum iterum: ǁ «Quone tu, lusor! abscisso vestis-dimidio, profectus, meo, | relictâ in sylvâ dormiente, deditâ,
19. amatâ, amate? ǁ Illa sane sicut jussa ita sedet te exspectans, | usta

दह्यमाना दिवारात्रं वस्त्रार्धेना ’भिसंवृता ॥ १९ ॥
तस्या रुदत्याः सततन् तेन दुःखेन पार्थिव ।
प्रसादङ् कुरु वै वीर प्रतिवाक्यं वदस्व च ॥ २० ॥
तस्यास् तत् प्रियम् आख्यानम् प्रवदस्व महामते ।
तद् एव वाक्यं वैदर्भी श्रोतुम् इच्छत्य् अनिन्दिता ॥ २१ ॥
एतच् छ्रुत्वा प्रतिवचस् तस्या दत्तन् त्वया किल ।
यत् पुरा तत् पुनस् त्वत्तो वैदर्भी श्रोतुम् इच्छति ॥ २२ ॥

बृहदश्व उवाच

एवम् उक्तस्य केशिन्या नलस्य कुरुनन्दन ।
हृदयं व्यथितञ् चा ’सीद् अश्रुपूर्णे च लोचने ॥ २३ ॥
स निगृह्या ’त्मनो दुःखन् दह्यमानो महीपतिः ।

---

20. die-*et* nocte, vestis-dimidio induta. ॥ Illi flenti semper, ob hunc dolorem, rex! । benignitatem impertire, heros! responsum dicque.» ॥
21. Illi illam caram loquelam dic, magnanime, । illum ipsum sermonem
22. Vaidarbhia audire cupit non-spreta. ॥ Illo audito (*Brâhmani dicto*), responsum illi datum a te sane । quod olim, hoc iterum a te Vaidarbhia audire cupit. ॥

Vrihadasvus dixit:

23. Sic compellati a Cêsiniâ Nali, Curuis-proles! । cor afflictumque
24. erat, lacrymis-plenique oculi. ॥ Iste, cohibito suo dolore, ustus ter-

बाष्पसन्दिग्धया वाचा पुनर् एवे 'दम् अब्रवीत् ॥ २४ ॥
वैषम्यम् अपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानम् आत्मना सत्यो जितस्वर्गा न संशयः ॥ २५ ॥
रहिता भर्तृभिश् चा 'पि न क्रुध्यन्ति कदाचन ।
प्राणांश् चारित्रकवचाम् धारयन्ति वरस्त्रियः ॥ २६ ॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत् सा तेन परित्यक्ता तत्र न क्रोद्धुम् अर्हति ॥ २७ ॥
प्राणयात्राम् परिप्रेप्सोः शकुनैर् हृतवाससः ।
आधिभिर् दह्यमानस्य श्यामा न क्रोद्धुम् अर्हति ॥ २८ ॥
सत्कृता 'सत्कृता वा 'पि पतिन् दृष्ट्वा तथा ''गतम् ।
भ्रष्टराज्यं श्रिया हीनङ् क्षुधितं व्यसनाप्लुतम् ॥ २९ ॥

---

25. rae-dominus, I lacrymis-obruta voce iterum quidem hoc dixit: II In miseriam quoque profectae custodiunt generosae-feminae I se per se,
26. bonae, victum-coelum *habentes*, non dubium. II Desertae a conjugibusque etiam non irascuntur unquam, I vitam virtutis-loricâ *instructam*
27. agunt eximiae-feminae. II Aerumnoso, stulto, lapsum-gaudiumque *ha-*
28. *bente* I quod illa ab illo relicta, idcirco ne irasci velit. II Vitae-victum desideranti, ab avibus captam vestem *habenti*, I sollicitudinibus
29. usto, nigra ne irasci velit; II bene-tractata, non-bene-tractatave, conjugem videns sic aggressum, I lapsum-regnum *habentem*, felicitate

एवम् ब्रुवाणस् तद् वाक्यन् नलः परमदुःखितः ।
न वाष्पम् अशकत् सोढुम् प्ररुरोदा ऽथ भारत ॥ ३० ॥
ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत् ।
तत् सर्वङ् कथितञ् चै ऽव विकारञ् चै ऽव तस्य तम् ॥ ३१ ॥
॥ इति नलोपाख्याने द्वाविंशतितमः सर्गः ॥ २२ ॥

बृहदश्व उवाच

दमयन्ती तु तच् छ्रुत्वा भृशं शोकपरायणा ।
शङ्कमाना नलन् तं वै केशिनीम् इदम् अब्रवीत् ॥ १ ॥

---

30. orbatum, famelicum, calamitate-submersum. — ‖ Sic dicens hunc
sermonem Nalus maxime-afflictus, | non lacrymas poterat sustinere,
31. flebat tum, Bhârate! ‖ Deinde illa Cêsinia, profecta, Damayantiae me-
moravit | illud omne dictumque nempe, commotionemque nempe il-
lius illam. ‖

## LIBER VICESIMUS TERTIUS.

Vrihadasvus dixit:

1. Damayantia vero, hoc audito, valde moerori-addicta, | opinans
2. Nalum *esse* illum quidem, Cêsiniae hoc dixit: ‖ I, Cêsinia! iterum

गच्छ केशिनि भूयस् त्वम् परीक्षाङ् कुरु बाहुके ।
अब्रुवाणा समीपस्था चरितान्य् अस्य लक्षय ॥ २ ॥
यदा च किञ्चित् कुर्यात् स कारणन् तत्र भाविनि ।
तत्र सञ्चेष्टमानस्य लक्षयन्ती विचेष्टितम् ॥ ३ ॥
न चा ’स्य प्रतिबन्धेन देयो ऽग्निर् अपि केशिनि ।
याचते न जलन् देयं सर्वथा त्वरमाणया ॥ ४ ॥
एतत् सर्वं समीक्ष्य त्वञ् चरितम् मे निवेदय ।
निमित्तं यत् त्वया दृष्टं बाहुके वै त्व् अमानुषम् ॥ ५ ॥
दमयन्त्यै ’वम् उक्ता सा जगामा ’थ च केशिनी ।
निशम्या ’थ हयज्ञस्य लिङ्गानि पुनर् आगमत् ॥ ६ ॥
सा तत् सर्वं यथावृत्तन् दमयन्त्यै न्यवेदयत् ।

---

tu, explorationem fac in Vâhuco, | non-loquens in propinquitate-
3. stans, facta ejus observa; || quandoque quodpiam faciat is factum,
4. ibi, egregia! | ibi operantis observans *sis* operam. || Neque ei, im-
peditionis causâ, dandus ignis vero, Cêsinia, | poscenti non aqua
5. danda *est* omnino a festinante *te*. || Hoc omne, postquam observave-
ris, tu factum mihi memora, | signum quod a te conspectum in Vâ-
6. huco quidem non-humanum. || A Damayantia sic compellata illa
ivit tum etiam Cêsinia; | perceptis tum equorum-gnari signis, rur-
7. sus adiit *Damayantiam*. || Ea illud omne sicut-factum Damayantiae

निमित्तं यत् तया दृष्टं वाहुके वै त्व् अमानुषम् ॥ ७ ॥

केशिन्य् उवाच

दृढं शुच्युपचारो ऽसौ न मया मानुषः क्वचित् ।
दृष्टपूर्वः श्रुतो वा ऽपि दमयन्ति तथाविधः ॥ ८ ॥
ह्रस्वम् आसाद्य सञ्चारन् ना ऽसौ विनमते क्वचित् ।
तन् तु दृष्ट्वा यथासङ्गम् उत्सर्पति यथासुखम् ॥ ९ ॥
ऋतुपर्णस्य चा ऽर्थाय भोजनीयम् अनेकशः ।
प्रेषितन् तत्र राज्ञा तु मांसम् बहु च पाशवम् ॥ १० ॥
तस्य प्रक्षालनार्थाय कुम्भास् तत्रो ऽपकल्पिताः ।
ते तेना ऽवेक्षिताः कुम्भाः पूर्णा एवा ऽभवंस् ततः ॥ ११ ॥
ततः प्रक्षालनङ् कृत्वा समधिश्रित्य वाहुकः ।

---

memoravit, | signum quod ab eâ conspectum in Vâhuco quidem non-humanum. ||

Cêsinia dixit:

8. Valde pura-facta *habens est* ille; non a me homo unquam | conspe-
9. ctus-antea auditusve etiam, Damayantia! talis. || Humilem aggressus introitum non ille se inclinat unquam, | eo autem viso, sicut-deside-
10. rium extendit (se introitus) ad-libidinem, || Rituparniquc causâ cibus
11. varius | missus *est* illuc a rege nempe, caro multaque pecunia; || hujus lavationis-causâ vasa illuc apportata *sunt*, | haec ab illo adspecta vasa
12. plena sane fiebant tum. || Deinde, postquam lavationem fecerat, ag-

तृणमुष्टिं समादाय सवितुस् तं समादधात् ॥ १२ ॥
अथ प्रज्वलितस् तत्र सहसा हव्यवाहनः ।
तद् अद्भुततमन् दृष्ट्वा विस्मिता ऽहम् इहा ऽगता ॥ १३ ॥
अन्यच् च तस्मिन् सुमहद् आश्चर्यं लक्षितम् मया ।
यद् अग्निम् अपि संस्पृश्य नै ऽवा ऽसौ दह्यते शुभे ॥ १४ ॥
छन्देन चो ऽदकन् तस्य वहत्य् आवर्जितन् द्रुतम् ।
अतीव चा ऽन्यत् सुमहद् आश्चर्यन् दृष्टवत्य् अहम् ॥ १५ ॥
यत् स पुष्पाण्य् उपादाय हस्ताभ्याम् ममृदे शनैः ।
मृद्यमानानि पाणिभ्यान् तेन पुष्पाणि तान्य् अथ ॥ १६ ॥
भूय एव सुगन्धीनि हृषितानि भवन्ति हि ।
एतान्य् अद्भुतलिङ्गानि दृष्ट्वा ऽहन् द्रुतम् आगता ॥ १७ ॥

---

gressus Vâhucus, | graminis-manipulum postquam ceperat, solem ver-
13. sus eum tenuit; || tum flagrans *fuit* in eo cito ignis. | Hoc mirissimum
14. tuita, obstupefacta ego aggressa *sum*. || Aliudque in eo permagnum
miraculum conspectum *est* a me, | quod ignem ipsum tangendo non
15. certe ille uritur, pulchra! || Ad arbitriumque aqua ei fluit, quae eva-
nuit, celeriter. | Maximeque aliud permagnum miraculum tuita ego, ||
16. quod is flores, postquam ceperat, manibus contrivit lente, | contriti
17. manibus ab eo flores illi tum || magis nempe bene-odori *et* arrecti
fiunt. | Haec mira-signa tuita, ego celeriter aggressa *sum*. ||

वृहदश्व उवाच

दमयन्ती तु तच् छ्रुत्वा पुण्यश्लोकस्य चेष्टितम् ।
अमन्यत नलम् प्राप्तङ् कर्म चे 'ष्टाभिसूचितम् ॥ १८ ॥
सा शङ्कमाना भर्तारन् नलं वाहुकरूपिणम् ।
केशिनीं श्लक्ष्णया वाचा रुदती पुनर् अब्रवीत् ॥ १९ ॥
पुनर् गच्छ प्रमत्तस्य वाहुकस्यो 'पसंस्कृतम् ।
महानसाच् छ्रितम् मांसं समादाये 'हि भाविनि ॥ २० ॥
सा गत्वा वाहुकस्या 'ग्रे तन् मांसम् अपकृष्य च ।
अत्युष्णम् एव त्वरिता तत्क्षणात् प्रियकारिणी ।
दमयन्त्यै ततः प्रादात् केशिनी कुरुनन्दन ॥ २१ ॥
सो 'चिता नलसिद्धस्य मांसस्य बहुशः पुरा ।

---

Vrihadasvus dixit:

18. Damayantia vero, hac auditâ Punyaslôci operâ, | putavit Nalum aggres-
19. sum *esse,* factumque optato-junctum. ‖ Ea, opinans conjugem Nalum
*esse* Vâhuci-formâ *praeditum,* | Cêsiniae suavi voce flens rursus
20. dixit: ‖ Rursus i, amentis Vâhuci paratam | e culinâ coctam carnem
21. postquam sumseris, veni, egregia! ‖ Illa, postquam ierat ad Vâhucum
prope, illam carnem detraxeratque, | percalidam quidem festinans eo-
dem-momento, gratum-faciens, | Damayantiae tum dedit Cêsinia,
22. Curuis-proles! ‖ Illa, experta a Nalo-paratam carnem saepe antea, |

प्राश्य मत्वा नलं सूतम् प्राक्रोशद् भृशदुःखिता ॥ २२ ॥
वैक्लव्यम् परमङ् गत्वा प्रक्षाल्य च मुखन् ततः ।
मिथुनम् प्रेषयामास केशिन्या सह भारत ॥ २३ ॥
इन्द्रसेनां सह भ्रात्रा समभिज्ञाय वाहुकः ।
अभिद्रुत्य ततो राजा परिष्वज्या ऽङ्कम् आनयत् ॥ २४ ॥
वाहुकस् तु समासाद्य सुतौ सुरसुतोपमौ ।
भृशन् दुःखपरीतात्मा सुस्वरम् प्ररुरोद ह ॥ २५ ॥
नैषधो दर्शयित्वा तु विकारम् असकृत् तदा ।
उत्सृज्य सहसा पुत्रौ केशिनीम् इदम् अब्रवीत् ॥ २६ ॥
इदं सुसदृशम् भद्रे मिथुनम् मम पुत्रयोः ।
अतो दृष्ट्वै ऽव सहसा वाष्पम् उत्सृष्टवान् अहम् ॥ २७ ॥

---

postquam ederat, putans Nalum *esse* aurigam, clamavit valde-afflicta. ‖
23. Commotionem magnam aggressa, ablutoque ore tum, | par *liberorum*
24. misit cum Cêsiniâ, Bhârate! ‖ Indrasênam cum fratre, postquam co-
gnoverat Vâhucus, | postquam accurrerat tum rex, amplexus, gremio
25. admovit. ‖ Vâhucus autem, postquam accesserat ad liberos Deorum-
26. liberis-similes, | valde dolore-affecto-animo perclare flevit. ‖ Naischa-
dhus, postquam ostenderat vero commotionem frequenter tunc, | re-
27. lictis cito liberis, Cêsiniae hoc dixit: ‖ Hoc persimile *est*, eximia! par
meis duobus liberis, | ideo, tuitus nempe subito, lacrymas emisi ego. ‖

बहुशः सम्पतन्तीन् त्वाञ् जनः शङ्केत दोषतः ।
वयञ् च देशातिथयो गच्छ भद्रे यथासुखम् ॥ २८ ॥
॥ इति नलोपाख्याने त्रयोविंशतितमः सर्गः ॥ २३ ॥

वृहदश्व उवाच

सर्वं विकारन् दृष्ट्वा तु पुण्यश्लोकस्य धीमतः ।
आगत्य केशिनी क्षिप्रन् दमयन्त्यै न्यवेदयत् ॥ १ ॥
दमयन्ती ततो भूयः प्रेषयामास केशिनीम् ।
मातुः सकाशन् दुःखार्त्ता नलदर्शनकाङ्क्षया ॥ २ ॥
परीक्षितो मे बहुशो वाहुको नलशङ्कया ।

---

28. Saepe congredientem te homines suspiciant vitii, | nos vero terrae-hospites *sumus;* i, eximia! ad-libidinem. ||

## LIBER VICESIMUS QUARTUS.

Vrihadasvus dixit:

1. Totam commotionem tuita vero Punyaslôci sapientis, | aggressa Cê-
2. sinia cito Damayantiae memoravit. || Damayantia tum rursus misit
Cêsiniam, | in matris propinquitatem, dolore-afflicta, Nalum-vi-
3. dendi-cupiditate: || «Exploratus *est* a me multum Vâhucus Nali-sus-

रूपे मे संशयस् त्व् एकः स्वयम् इच्छामि वेदितुम् ॥ ३ ॥
स वा प्रवेश्यताम् मातर् मां वा 'नुज्ञातुम् अर्हसि ।
विदितं वा 'थवा 'ज्ञातम् पितुर् मे संविधीयताम् ॥ ४ ॥
एवम् उक्ता तु वैदर्भ्या सा देवी भीमम् अब्रवीत् ।
दुहितुस् तम् अभिप्रायम् अन्वजानात् स पार्थिवः ॥ ५ ॥
सा वै पित्रा 'भ्यनुज्ञाता मात्रा च भरतर्षभ ।
नलम् प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥ ६ ॥
तां स्म दृष्ट्वे 'व सहसा दमयन्तीन् नलो नृपः ।
आविष्टः शोकदुःखाभ्याम् बभूवा 'श्रुपरिप्लुतः ॥ ७ ॥
तन् तु दृष्ट्वा तथा ''युक्तान् दमयन्ती नलन् तदा ।
तीव्रशोकसमाविष्टा बभूव वरवर्णिनी ॥ ८ ॥

---

picione, | in formâ mihi dubium vero unum; ipsa cupio noscere. ||
4. Ille aut ut intret curetur, mater! aut me dimittere velis; | aut notum
5. aut ignotum patris mei decernatur.» || Sic compellata vero a Vaidarbhiâ illa regina Bhîmo dixit | filiae illud consilium; permisit hic rex. ||
6. Illa vero a patre veniam adepta a matreque, Bharatorum-princeps! |
7. Nalum intrare fecit ubi sui habitatio. || Eam tuitus autem subito, Damayantiam Nalus rex, | captus moerore-*et* dolore, erat lacrymis-
8. circumfusus. || Eum vero tuita sic adjunctum Damayantia Nalum
9. tunc, | acri-moerore-capta erat egregia. || Deinde rubrâ-veste

ततः काषायवसना जटिला मलपङ्किनी ।
दमयन्ती महाराज बाहुकं वाक्यम् अब्रवीत् ॥ ९ ॥
दृष्टपूर्वस् त्वया कश्चिद् धर्मज्ञो नाम बाहुक ।
सुप्ताम् उत्सृज्य विपिने गतो यः पुरुषः स्त्रियम् ॥ १० ॥
अनागसम् प्रियाम् भार्यां विजने श्रममोहिताम् ।
अपहाय तु को गच्छेत् पुण्यश्लोकम् ऋते नलम् ॥ ११ ॥
किन् नु तस्य मया बाल्याद् अपराद्धम् महीपतेः ।
यो माम् उत्सृज्य विपिने गतवान् निद्रया हृताम् ॥ १२ ॥
साक्षाद् देवान् अपहाय वृतो यः स मया पुरा ।
अनुव्रतां साभिकामाम् पुत्रिणीन् त्यक्तवान् कथम् ॥ १३ ॥
अग्नौ पाणिङ् गृहीत्वा च देवानाम् अग्रतस् तथा ।

---

*induta,* implicitis-comis, luto-*et* coeno obducta, | Damayantia, magne-
10. rex! Vâhuco sermonem dixit: || *Num* conspectus *est* antea a te quis-
piam, officiorum-gnarus nempe, Vâhuce, | dormientem relinquens in
11. sylvâ profectus *est* qui vir feminam? || Expertem-peccatorum, caram
uxorem, in deserto lassitudine-conturbatam, | relinquens vero quis eat
12. Punyaslôcum praeter Nalum? || Quaene huic per me ab infantiâ of-
fensio *est* terrae-domino, | quod me relinquens in sylvâ profectus *est,*
13. somno captam? || Palam, Diis relictis, electus *est* qui ille a me olim, |
14. deditam, amantem, liberos habentem deseruit quomodo? || Super
igne manu prehensâque, Diis coram ita, | «ero,» sic «veritatem»

भविष्यामी 'ति सत्यञ् च प्रतिश्रुत्य क्व तद् गतम् ॥ १४ ॥
दमयन्त्या ब्रुवन्त्यास् तु सर्वम् एतद् अरिन्दम ।
शोकजं वारि नेत्राभ्याम् असुखम् प्रास्रवद् बहु ॥ १५ ॥
अतीव कृष्णताराभ्यां रक्तान्ताभ्याञ् जलन् तु तत् ।
परिस्रवन् नलो दृष्ट्वा शोकार्ताम् इदम् अब्रवीत् ॥ १६ ॥
मम राज्यम् प्रणष्टं यन् ना 'हन् तत् कृतवान् स्वयम् ।
कलिना तत् कृतम् भीरु यच् च त्वाम् अहम् अत्यजम् ॥ १७ ॥
यत् त्वया धर्मकृच्छ्रे तु शापेना 'भिहतः पुरा ।
वनस्थया दुःखितया शोचन्त्या मान् दिवानिशम् ॥ १८ ॥
स मच्छरीरे त्वच्छापाद् दह्यमानो ऽवसत् कलिः ।
त्वच्छापदग्धः सततं सो ऽग्नाव् अग्निर् इवा "हितः ॥ १९ ॥

---

15. etiam pollicitus, quo hoc abiit? — ‖ Damayantiae dicentis vero omne hoc, hostis-domitor! | moerore-natus humor ex oculis dolorosus fluebat multus. ‖ E maxime nigris, rubros-angulos *habentibus* humoremque
16. 
17. hunc | fluentem Nalus tuitus, moerore-afflictae hoc dixit: ‖ Meum regnum perditum quod, non ego hoc feci ipse; | a Cale hoc factum,
18. timida! quodque te ego deserui; ‖ quam ob rem a te, in officii-difficultate nempe, exsecratione ictus antea, | in sylvâ-versante, afflictâ,
19. dolente de me die-*et* nocte. ‖ Ille in meo-corpore, tuâ exsecratione ustus, habitavit Calis, | tuâ-exsecratione-ustus semper ille, igni ignis

मम च व्यवसायेन तपसा चै ’व निर्जितः ।
दुःखस्या ’न्तेन च तेन भवितव्यं हि नौ शुभे ॥ २० ॥
विमुच्य माङ् गतः पापस् ततो ऽहम् इह चा ’गतः ।
त्वदर्थं विपुलश्रोणि न हि मे ऽन्यत् प्रयोजनम् ॥ २१ ॥
कथन् तु नारी भर्तारम् अनुरक्तम् अनुव्रतम् ।
उत्सृज्य वरयेद् अन्यं यथा त्वम् भीरु कर्हिचित् ॥ २२ ॥
दूताश् चरन्ति पृथिवीङ् कृत्स्नान् नृपशासनात् ।
भैमी किल स्म भर्तारन् द्वितीयं वरयिष्यति ॥ २३ ॥
स्वैरवृत्ता यथाकामम् अनुरूपम् इवा ’त्मनः ।
श्रुत्वै ’व चै ’तत् त्वरितो भाङ्गासुरिर् उपस्थितः ॥ २४ ॥
दमयन्ती तु तच् छ्रुत्वा नलस्य परिदेवितम् ।

---

20. veluti adhibitus; ‖ meâque operâ devotioneque etiam victus. | Dolo-
21. ris ob finemque hunc existendum *est* nobis, pulchra! ‖ Soluto me,
profectus *est* scelestus; deinde ego huc aggressus, | tuâ causâ, turgi-
22. dis-femoribus *praedita!* non enim mihi aliud negotium. ‖ Quomodo
vero femina, conjugem deditum, devotum | relinquens eligat alium,
23. sicut tu, timida! unquam? ‖ Nuntii peragrant terram totam, regis-
24. jussu, | « Bhaimia sane conjugem alterum eliget, ‖ libero-facto
*praedita,* ad-libidinem, convenientem sicut sibi. » ‖ Audito autem
25. hoc, festinans Bhângâsuris aggressus *est.* — ‖ Damayantia vero, hoc

प्राञ्जलिर् वेपमाना च भीता च नलम् अब्रवीत् ॥ २५ ॥
न माम् अर्हसि कल्याण दोषेण परिशङ्कितुम् ।
मया हि देवान् उत्सृज्य वृतस् त्वन् निषधाधिप ॥ २६ ॥
तवा ऽधिगमनार्थन् तु सर्वतो ब्राह्मणा गताः ।
वाक्यानि मम गाथाभिर् गायमाना दिशो दश ॥ २७ ॥
ततस् त्वाम् ब्राह्मणो विद्वान् पर्णादो नाम पार्थिव ।
अभ्यगच्छत् कोशलायाम् ऋतुपर्णनिवेशने ॥ २८ ॥
तेन वाक्ये कृते सम्यक् प्रतिवाक्ये तथा ऽऽहृते ।
उपायो ऽयम् मया दृष्टो नैषधा ऽऽनयने तव ॥ २९ ॥
त्वाम् ऋते न हि लोके ऽन्य एकाह्ना पृथिवीपते ।
समर्थो योजनशतङ् गन्तुम् अश्वैर् नराधिप ॥ ३० ॥

---

audito Nali questu, | implicitis manibus, tremensque timidaque Nalo
26. dixit: || Ne me velis tu, eximie! vitii suspicere; | a me enim, Diis reli-
27. ctis, electus tu, Nischadhorum-regnator! || Tui aditus-causâ vero quo-
quoversus Brâhmani profecti *sunt,* | dicta mea ad modulos canentes,
28. plagas decem versus. || Deinde te Brâhmanus sapiens, Parnâdus no-
29. mine, rex! | adiit Cósalae, in Rituparni-domo. || Ab illo loquelâ
factâ omnino, responso etiam accepto, | dolus hic a me conspectus,
30. Naischadhe! ad adducendum te. || Te praeter non enim in mundo
alius uno-die, terrae-domine! | potis *yôdschana* centum ire equis,

स्पृशेयन् तेन सत्येन पादाव् एतौ महीपते ।
यथा ना ऽसत्कृतङ् किंचिन् मनसा ऽपि चराम्य् अहम् ॥३१॥
अयञ् चरति लोके ऽस्मिन् भूतसाक्षी सदागतिः ।
एष मे मुञ्चतु प्राणान् यदि पापञ् चराम्य् अहम् ॥ ३२ ॥
तथा चरति तिग्मांशुः परेण भुवनं सदा ।
स मुञ्चतु मम प्राणान् यदि पापञ् चराम्य् अहम् ॥ ३३ ॥
चन्द्रमाः सर्वभूतानाम् अन्तश् चरति साक्षिवत् ।
स मुञ्चतु मम प्राणान् यदि पापञ् चराम्य् अहम् ॥ ३४ ॥
एते देवास् त्रयः कृत्स्नन् त्रैलोक्यन् धारयन्ति वै ।
विब्रुवन्तु यथासत्यम् एते वा ऽद्य त्यजन्तु माम् ॥ ३५ ॥
एवम् उक्तस् तया वायुर् अन्तरिक्षाद् अभाषत ।

---

31. hominum-regnator! ‖ Tangam per hanc veritatem pedes hos, terrae-
domine! | sicut non malum quidquam mente adeo committo ego. ‖
32. Hic vadit in mundo hoc animantium-testis Ventus, | iste meam solvito
33. vitam, si peccatum committo ego. ‖ Ita vadit Sol super mundo sem-
34. per, | is solvito meam vitam, si peccatum committo ego. ‖ Luna
omnium-creatorum in medio vadit testis-instar; | ea solvito meam
35. vitam, si peccatum committo ego. ‖ Hi Dii tres totos tres mundos
sustinent vere; | edicunto sicut-verum, istive hodie relinquunto
36. me. — ‖ Sic compellatus ab eâ Ventus, ex aëre dixit: | Non haec

नै 'षा कृतवती पापन् नल सत्यम् ब्रवीमि ते ॥ ३६ ॥
राजन् शीलनिधिः स्फीतो दमयन्त्याः सुरक्षितः ।
साक्षिणो रक्षिणश् चा 'स्या वयन् त्रीन् परिवत्सरान् ॥ ३७ ॥
उपायो विहितश् चा 'यन् त्वदर्थम् अतुलो ऽनया ।
न ह्य् एकाह्ना शतङ् गन्ता त्वाम् ऋते ऽन्यः पुमान् इह ॥ ३८ ॥
उपपन्ना त्वया भैमी त्वञ् च भैम्या महीपते ।
ना 'त्र शङ्का त्वया कार्या सङ्गच्छ सह भार्यया ॥ ३९ ॥
तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर् ववौ च पवनः शिवः ॥ ४० ॥
तद् अद्भुततमन् दृष्ट्वा नलो राजा 'थ भारत ।
दमयन्त्यां विशङ्कान् तां व्यपाकर्षद् अरिन्दम ॥ ४१ ॥

---

37. fecit peccatum, Nale! veritatem dico tibi. ‖ Rex! virtutis-thesaurus tumidus Damayantiae bene-custoditus; | testes custodesque ejus nos
38. tres annos. ‖ Dolus constitutusque hic tuâ causâ expers-paris ab eâ; | non enim uno-die centum (*jódschana*) ibit te praeter alius vir heic. ‖
39. Adita a te Bhaimia, tuque a Bhaimiâ, terrae-domine! | Non in hoc
40. dubium a te faciendum, congredere cum uxore. — ‖ Sic loquente Vento autem, florum-pluvia cadebat, | deorum tympana sonabant, fla-
41. batque zephyrus secundus. ‖ Hoc mirissimum tuitus, Nalus rex tum, Bhârate! | de Damayantiâ suspicionem illam detraxit, hostis-domi-

दमयन्त्य् अपि भर्तारम् आसाद्या ऽप्यायिता भृशम् ।
अर्धसञ्जातसस्ये ऽव तोयम् प्राप्य वसुन्धरा ॥ ५२ ॥
सै ऽवं समेत्य व्यपनीय तन्द्रां शान्तज्वरा हर्षविवृद्धसत्त्वा ।
रराज भैमी समवाप्तकामा शीतांशुना रात्रिर् इवो ऽदितेन ॥ ५३ ॥
॥ इति नलोपाख्याने चतुर्विंशतितमः सर्गः ॥ २४ ॥

वृहदश्व उवाच

अथ तां व्युषितो रात्रिन् नलो राजा स्वलङ्कृतः ।
वैदर्भ्या सहितः काले ददर्श वसुधाधिपम् ॥ १ ॥

---

52. gaudium. ‖ Damayantia quoque, conjugem aggressa, crescens valde, |
53. semi-natis-fructibus veluti aquam nacta terra. ‖ Ea sic congressa (cum conjuge), depositâ lassitudine, sedatâ-difficultate, gaudio-amplificatâ-mente *praedita,* | splendebat Bhaimia impetratis-optatis, lunâ nox veluti ortâ. ‖

## LIBER VICESIMUS QUINTUS.

Vrihadasvus dixit:

1. Tum, illam postquam degerat noctem, Nalus rex benê-ornatus, |
2. cum Vaidarbhiâ conjunctus, tempore vidit terrae-regnatorem. ‖ De-

ततो ऽभिवादयामास प्रयतः श्वशुरन् नलः ।
तस्या ऽनु दमयन्ती च ववन्दे पितरं शुभा ॥ २ ॥
तम् भीमः प्रतिजग्राह पुत्रवत् परया मुदा ।
यथार्हम् पूजयित्वा च समाश्वासयत प्रभुः ।
नलेन सहितान् तत्र दमयन्तीम् पतिव्रताम् ॥ ३ ॥
ताम् अर्हणान् नलो राजा प्रतिगृह्य यथाविधि ।
परिचर्यां स्वकान् तस्मै यथावत् प्रत्यवेदयत् ॥ ४ ॥
ततो बभूव नगरे सुमहान् हर्षजः स्वनः ।
जनस्य सम्प्रहृष्टस्य नलन् दृष्ट्वा तथा ऽगतम् ॥ ५ ॥
अशोभयन्त नगरम् पताकाध्वजमालिनम् ।
सिक्ताः सुमृष्टपुष्पाढ्या राजमार्गाः स्वलङ्कृताः ॥ ६ ॥

---

inde salutavit demissus socerum Nalus, | post eum Damayantia quoque
3. reverenter salutavit patrem pulchra. || Illum Bhîmus excepit filii-
instar summo cum gaudio; | sicut dignum postquam honoraveratque
*eum*, consolatus est praecellens | Nalo conjunctam ibi Damayantiam,
4. conjugi-devotam. || Illum honorem Nalus rex postquam acceperat se-
5. cundum-legem, | obedientiam suam illi congrue declaravit. || Deinde
fuit in urbe permagnus gaudio-natus sonitus | hominum laetorum,
6. Nalo conspecto sic aggresso. || Ornarunt urbem vexillis-*et* sertis in-
structam; | irrigatae, perpuris-floribus-et ceteris *instructae* regiae-viae

द्वारि द्वारि च पौराणाम् पुष्पभङ्गः प्रकल्पितः ।
अर्चितानि च सर्वाणि देवतायतनानि च ॥ ७ ॥
ऋतुपर्णो ऽपि शुश्राव बाहुकच्छद्मिनन् नलम् ।
दमयन्त्या समायुक्तञ् जहृषे च नराधिपः ॥ ८ ॥
तम् आनाय्य नलो राजा क्षमयामास पार्थिवम् ।
स च तङ् क्षमयामास हेतुभिर् बुद्धिसम्मितः ॥ ९ ॥
स सत्कृतो महीपालो नैषधं विस्मिताननः ।
दिष्ट्या समेतो दारैः स्वैर् भवान् इत्य् अभ्यनन्दत ॥ १० ॥
कच्चित् तु ना ऽपराधन् ते कृतवान् अस्मि नैषध ।
अज्ञातवासं वसतो मद्गृहे वसुधाधिप ॥ ११ ॥

---

7. bene-ornatae; ‖ ad portam àd portamque civium florum-contritio
8. facta, | honorataque omnia Deorum-altaria etiam. ‖ Rituparnus quo-
que audivit de Vâhuci-formâ-induto Nalo | Damâyantiae adjuncto,
9. gavisusque est hominum-regnator. ‖ Huic, postquam adducendum
curaverat, Nalus rex excusavit *se*, principi; | hicque ei excusavit *se*
10. rationibus, intellectu-praeditus. ‖ Hic, hospitio exceptus terrae-cu-
stos, Naischadho, obstupefactum-vultum *habens*, | «Proh felicitatem!
11. congressus cum uxore tuâ tu»; sic gratulatus est. ‖ «Nonne offensio-
nem tibi feci, Naischadhe! | incognitâ-habitatione habitanti in meâ-
12. domo, terrae-regnator? ‖ Si consilio-praecedente praedita, si sine-

यदि वा बुद्धिपूर्वाणि यद्य् अबुद्ध्या 'पि कानिचित् ।
मया कृतान्य् अकार्याणि तानि त्वङ् क्षन्तुम् अर्हसि ॥ १२ ॥

नल उवाच

न मे ऽपराधङ् कृतवांस् त्वं स्वल्पम् अपि पार्थिव ।
कृते ऽपि च न मे कोपः क्षन्तव्यं हि मया तव ॥ १३ ॥
पूर्वं ह्य् अपि सखा मे ऽसि सम्बन्धी च जनाधिप ।
अत ऊर्ध्वन् तु भूयस् त्वम् प्रीतिम् आहर्तुम् अर्हसि ॥ १४ ॥
सर्वकामैः सुविहितैः सुखम् अस्म्य् उषितस् त्वयि ।
न तथा स्वगृहे राजन् यथा तव गृहे सदा ॥ १५ ॥
इदञ् चै 'व हयज्ञानन् त्वदीयम् मयि तिष्ठति ।
तद् उपाकर्तुम् इच्छामि मन्यसे यदि पार्थिव ॥ १६ ॥

---

consilio etiam quaepiam | a me facta *sunt* non-facienda, haec tu condonare velis. » ||

Nalus dixit:

13. Non mihi offensionem fecisti tu, perparvam etiam, rex! | Factâ etiam-
14. que, non mihi *esset* ira; condonandum enim a me tibi. || Antea enim
amicus meus eras propinquusque, hominum-regnator! | Ab hoc *tem-*
15. *pore* in posterum etiam rursus tu gaudium afferre velis. || Omnibus-
optatis bene-constitutis jucunde sum moratus apud te. | Non sic in
16. propriâ meâ-domo, rex! sicut in tuâ domo semper. || Haec vero equo-
17. rum-scientia tua apud me est, | eam tradere volo, si putas, rex! || Sic

एवम् उक्त्वा ददौ विद्याम् ऋतुपर्णाय नैषधः ।
स च ताम् प्रतिजग्राह विधिदृष्टेन कर्मणा ॥ १७ ॥
गृहीत्वा चा ऽश्वहृदयं राजन् भाङ्गासुरिर् नृपः ।
सूतम् अन्यम् उपादाय ययौ स्वपुरम् एव ह ॥ १८ ॥
ऋतुपर्णे गते राजन् नलो राजा विशाम् पते ।
नगरे कुण्डिने कालन् ना ऽतिदीर्घम् इवा ऽवसत् ॥ १९ ॥

॥ इति नलोपाख्याने पञ्चविंशतितमः सर्गः ॥ २५ ॥

वृहदश्व उवाच

स मासम् उष्य कौन्तेय भीमम् आमन्त्र्य नैषधः ।

---

fatus, dedit scientiam Rituparno Naischadhus, । illeque eam accepit
18. cum normam-conspectam *habente* facto. ॥ Postquam acceperatque
equorum-scientiam, rex! Bhângâsuris regnator, । aurigâ alio assum-
19. pto, ivit in suam-urbem nempe. ॥ Rituparno profecto, rex! Nalus rex,
Visorum-domine! । in urbe Cundino tempus non valde-longum
habitavit. ॥

## LIBER VICESIMUS SEXTUS.

Vrihadasvus dixit:

1. Ille mensem moratus, Cauntêye! Bhîmo salutato, Naischadhus । ex

पुराद् अल्पपरीवारो जगाम निषधान् प्रति ॥ १ ॥
रथेनै 'केन शुभ्रेण दन्तिभिः परिषोडशैः ।
पञ्चाशद्भिर् हयैश् चै 'व षड् शतैश् च पदातिभिः ॥ २ ॥
स कम्पयन्न् इव महीन् त्वरमाणो महीपतिः ।
प्रविवेश सुसंरब्धस् तरसै 'व महामनाः ॥ ३ ॥
ततः पुष्करम् आसाद्य वीरसेनसुतो नलः ।
उवाच दीव्याव पुनर् बहु वित्तम् मया 'र्जितम् ॥ ४ ॥
दमयन्ती च यच् चा 'न्यन् मम किञ्चन विद्यते ।
एष वै मम सन्न्यासस् तव राज्यन् तु पुष्कर ॥ ५ ॥
पुनः प्रवर्ततान् द्यूतम् इति मे निश्चिता मतिः ।
पणेनै 'केन भद्रन् ते प्राणयोश् च पणावहे ॥ ६ ॥

---

2. urbe, paucos-famulos *habens*, ivit Nischadhos versus, ‖ cum curru uno splendido, cum elephantis sedecim, | cum quinquaginta equisque
3. etiam, sexies centumque peditibus. ‖ Iste, tremere faciens quasi terram, festinans terrae-dominus, | intravit valde-iratus, cum celeritate
4. nempe, magnanimus. ‖ Deinde, Puschcarum aggressus, Vîrasêni-filius Nalus | dixit: Ludamus iterum; multae divitiae a me acquisitae. ‖
5. Damayantiaque, et quod aliud mihi ullum est, | id quidem meum in
6. ludo positum, tuum *in ludo positum sit* regnum vero, Puschcare! ‖ Iterum versetur ludus, sic meum certum consilium, | ludo uno, salus tibi!

जित्वा परस्वम् आहृत्य राज्यं वा यदिवा वसु ।
प्रतिपाणः प्रदातव्यः परमो धर्म उच्यते ॥ ७ ॥
न चेद् वाञ्छसि त्वं द्यूतं युद्धद्यूतम् प्रवर्त्तताम् ।
द्वैरथेना ऽस्तु वै शान्तिस् तव वा मम वा नृप ॥ ८ ॥
वंशभोज्यम् इदं राज्यम् अर्थितव्यं यथातथा ।
येन केना ऽप्य् उपायेन वृद्धानाम् इति शासनम् ॥ ९ ॥
द्वयोर् एकतरे बुद्धिः क्रियताम् अद्य पुष्कर ।
कैतवेना ऽक्षवत्यां वा युद्धे वा नाम्यतान् धनुः ॥ १० ॥
नैषधेनै ऽवम् उक्तस् तु पुष्करः प्रहसन्न् इव ।
ध्रुवम् आत्मजयम् मत्वा प्रत्याह पृथिवीपतिम् ॥ ११ ॥
दिष्ट्या त्वया ऽर्जितं वित्तम् प्रतिपाणाय नैषध ।

---

7. de vitis etiam ludimus. ‖ Vincendo alius-proprio capto, vel regno vel
8. opulentia, | contra-lusus dandus summum officium appellatur. ‖ Nisi
cupis tu ludum, pugnae-ludus versetur. | Singulari certamine esto
9. nempe placatio tuave meave, rex! ‖ Hereditarium hoc regnum peten-
dum *est* quoquo modo, | quocunque etiam remedio; senum sic *est* prae-
10. ceptum. ‖ Duarum *rerum* in altera consilium fiat hodie, Puschcare! |
11. per lusum in talario ludove, in pugnâve tendatur arcus. — ‖ A Nai-
schadho sic compellatus vero Puschcarus, ridens quasi, | certam suam-
12. victoriam putans, respondit terrae-domino: ‖ Proh felicitatem! a te

दिष्ट्या च दुष्करङ् कर्म दमयन्त्याः क्षयङ् गतम् ॥ १२ ॥
दिष्ट्या च ध्रियसे राजन् सदारो ऽद्य महाभुज ।
धनेना ऽनेन वै भैमी जितेन समलङ्कृता ॥ १३ ॥
माम् उपस्थास्यति व्यक्तन् दिवि शक्रम् इवा ऽप्सराः ।
नित्यशो हि स्मरामि त्वाम् प्रतीक्षे ऽपि च नैषध ॥ १४ ॥
देवनेन मम प्रीतिर् न भवत्य् असुहृद्गणैः ।
जित्वा त्व् अद्य वरारोहान् दमयन्तीम् अनिन्दिताम् ॥ १५ ॥
कृतकृत्यो भविष्यामि सा हि मे नित्यशो हृदि ।
श्रुत्वा तु तस्य ता वाचो बह्वबद्धप्रलापिनः ॥ १६ ॥
इयेष स शिरश् छेत्तुङ् खड्गेन कुपितो नलः ।
स्मयन् तु रोषताम्राक्षस् तम् उवाच ततो नलः ॥ १७ ॥

---

acquisitae *sunt* divitiae ad contra-lusum, Naischadhe; | proh felicitatemque! difficile-factu opus Damayantiae ad finem *est* profectum. ‖

13. Proh felicitatemque! vivis, rex! cum-uxore hodie, magnis-brachiis *praedite!* | Divitiis his sane Bhaimia lucrifactis ornata ‖

14. mihi adstabit certe, in coelo Sacro veluti Apsarasis. | Semper enim recordor te, exspecto etiamque, Naischadhe; ‖

15. ludo mihi gaudium non est cum non-amicorum-turbis. | Lucrifactâ vero hodie pulchra-femora *habente* Damayantiâ, non-spretâ, ‖

16. contentus ero; ea enim mihi semper in corde. — | Auditis vero ejus his loquelis multum-*et* insanum-garrientis, ‖

17. voluit ille caput scindere ense iratus Nalus; | subridens vero, irâ-

पणावः किं व्याहरसे जितो न व्याहरिष्यसि ।
ततः प्रावर्तत द्यूतम् पुष्करस्य नलस्य च ॥ १८ ॥
एकपाणेन वीरेण नलेन स पराजितः ।
स रत्नकोषनिचयैः पाणेन पणितो ऽपि च ॥ १९ ॥
जित्वा च पुष्करं राजा प्रहसन्न् इदम् अब्रवीत् ।
मम सर्वम् इदं राज्यम् अव्यग्रं हतकण्टकम् ॥ २० ॥
वैदर्भी न त्वया शक्या राजापसद वीक्षितुम् ।
तस्यास् त्वं सपरीवारो मूढ दासत्वम् आगतः ॥ २१ ॥
न त्वया तत् कृतङ् कर्म येना ऽहं विजितः पुरा ।
कलिना तत् कृतङ् कर्म त्वन् तु मूढ न बुध्यसे ॥ २२ ॥
ना ऽहम् परकृतङ् कोपन् त्वय्य् आधास्ये कथञ्चन ।

---

18. rubros-oculos *habens*, illi dixit tum Nalus: ॥ Ludimus; quid fabularis?
victus non fabulaberis. — । Deinde versabatur ludus Puschcari Nali-
19. que; ॥ uno-ludo ab heroë Nalo ille victus est; । ille cum gemmarum-
20. *et* auri-acervis ludo lucrifactus *est* etiamque. ॥ Victoque Puschcaro,
rex ridens hoc dixit: । Meum *est* totum hoc regnum, imperturbatum,
21. occisis-hostibus *praeditum*. ॥ Vaidarbhia non a te potest, regum-ab-
jecte! spectari; । ejus tu cum-famulis, stulte! ad servitudinem *es* ag-
22. gressus. ॥ Non a te illud perfectum factum, quo ego victus antea, ।
23. a Cale illud perfectum factum, tu vero, stulte! non intelligis. ॥ Non ego

यथासुखं वै जीव त्वम् प्राणान् अवसृजामि ते ॥२३॥
तथै 'व सर्वं सम्भारं स्वम् अंशं वितरामि ते ।
तथै 'व च मम प्रीतिस् त्वयि वीर न संशयः ॥२४॥
सौहार्दञ् चै 'व मे त्वत्तो न कदाचित् प्रहास्यति ।
पुष्कर त्वं हि मे भ्राता सञ्जीव शरदां शतम् ॥२५॥
एवन् नलः सान्त्वयित्वा भ्रातरं सत्यविक्रमः ।
स्वपुरम् प्रेषयामास परिष्वज्य पुनः पुनः ॥२६॥
सान्त्वितो नैषधेने 'वम् पुष्करः प्रत्युवाच ह ।
पुण्यश्लोकन् तदा राजन् अभिवाद्य कृताञ्जलिः ॥२७॥
कीर्तिर् अस्तु तवा 'क्षय्या जीव वर्षायुतं सुखी ।
यो मे वितरसि प्राणान् अधिष्ठानञ् च पार्थिव ॥२८॥

---

ab alio-excitatum iram in te convertam ullo modo. I Ad-libidinem
24. quidem vive tu, vitam remitto tibi; II ita quoque omnes facultates,
propriam tuam partem, condono tibi. I Sic nempe mea voluptas in te,
25. heros! non dubium, II amicitiaque etiam mea a te non unquam dis-
cedet; I Puschcare! tu enim *es* meus frater, vive annos centum. — II
26. Sic Nalus consolatus, fratrem verâ-vi *praeditus* I in ipsius-urbem mi-
27. sit, amplexus iterum iterum. II Consolatione affectus a Naischadho
sic, Puschcarus respondit I Punyaslôco tunc, rex! postquam se incli-
28. naverat factam-manuum implicationem *habens:* II Gloria sit tibi pe-
rennis, vive annos-decies mille laetus, I qui mihi condonas vitam ur-

स तथा सत्कृतो राज्ञा मासम् उष्य ततो नृपः ।
प्रययौ स्वपुरं हृष्टः पुष्करः स्वजनान्वितः ॥ २९ ॥
महत्या सेनया सार्धं विनीतैः परिचारकैः ।
भ्राजमान इवा ऽऽदित्यो वपुषा भरतर्षभ ॥ ३० ॥
प्रस्थाप्य पुष्करं राजा वित्तवन्तम् अनामयम् ।
प्रविवेश पुरं श्रीमान् अत्यर्थम् उपशोभितम् ॥ ३१ ॥
प्रविश्य सान्त्वयामास पौरान् स निषधाधिपः ॥ ३२ ॥
पौरजानपदाश् चा ऽपि सम्प्रहृष्टतनूरुहाः ।
ऊचुः प्राञ्जलयः सर्वे ऽमात्यप्रमुखा जनाः ॥ ३३ ॥
अद्य स्म निर्वृता राजन् पुरे जनपदे ऽपि च ।
उपासितुम् पुनः प्राप्ता देवा इव शतक्रतुम् ॥ ३४ ॥

---

29. bemque, rex! — ‖ Ille sic hospitio affectus, mensem postquam habi-
taverat tum rex, | ivit in suam-urbem laetus Puschcarus, cognatis-
30. comitatus, ‖ magno cum exercitu, cum submissis servis, | splendens
31. sicut sol corpore, Bharatorum-princeps! — ‖ Postquam dimiserat
Puschcarum rex opulentum, incolumem, | intravit urbem felix supra-
32. modum ornatam. ‖ Postquam intraverat, consolatus est cives ille Ni-
33. schadhorum-regnator. ‖ Cives-rusticique vero, arrectos-pilos *haben-
tes* (*gaudio*), | dixerunt implicitis manibus omnes, cum-consiliario-
34. rum-praecipuis *versantes* homines: ‖ Hodie sumus felices, rex! in
urbe, ruri etiamque, | *te* cultum rursus profecti, Dii veluti Satacra-

प्रशान्ते पुष्करे हृष्टे सम्प्रवृत्ते महोत्सवे ।
महत्या सेनया राजा दमयन्तीम् उपानयत् ॥ ३५ ॥
दमयन्तीम् अपि पिता सत्कृत्य परवीरहा ।
प्रास्थापयद् अमेयात्मा भीमो भीमपराक्रमः ॥ ३६ ॥
आगतायान् तु वैदर्भ्यां सपुत्रायान् नलो नृपः ।
वर्तयामास मुदितो देवराड् इव नन्दने ॥ ३७ ॥
ततः प्रकाशतां यातो जम्बुद्वीपे स राजसु ।
पुनः शशास तद् राज्यम् प्रत्याहृत्य महायशाः ।
ईजे च विविधैर् यज्ञैः विधिवच् चाप्तदक्षिणैः ॥ ३८ ॥

॥ इति नलोपाख्यानं समाप्तम् ॥

35. tum. — ‖ Sedato Puschcaro laeto, praeteritâ magnâ-festivitate, |
36. magno cum exercitu rex Damayantiam adduxit. ‖ Damayantiam nempe
pater, beneficiis postquam affecerat hostium-heroum-occisor, | dimi-
37. sit immenso-animo *praeditus* Bhîmus timendâ-vi. ‖ Aggressâ vero
Vaidarbhiâ cum liberis, Nalus rex | erat laetus, Deorum-rex veluti in
38. Nandano. ‖ Deinde, ad claritatem profectus in Dschambudvipo is
inter reges, | rursus regebat illud regnum, postquam recuperaverat,
magnâ-gloriâ *praeditus*, | sacrificabatque variis sacrificiis ad normam
etiam, apto dono sacrificali instructis. ‖

# ANNOTATIONES.

---

## LIBER PRIMUS.

Sl. 3. *a*. Sanscrite, *Nischadhâh*, pluralis a Nischadha. Regio haec eadem esse videtur ac *Nischadha-râschtra* et *Nischadha-dèsa*, de quibus vide: Wilford, *List of mountains, rivers, countries, from the Purâna's and other books*. Asiat. Res. t. 8.

Sl. 4. *b*. Tschat. रत्निणान्.

Sl. 5. *a*. Hujus regionis urbs a poëta nostro Cundina, Vidarbhanagarî (i. e. Vidarbhorum urbs) et Vidarbha nominatur, et eadem ac Vaidarbha (Burra-Nagpoor, secundum Wilford) esse videtur.

Sl. 11. *b*. Radix आस् cl. 2. *Atm*. Praeteritum augment. primum nonnunquam ad primae classis normam *Parasmaipadi* format; ita heic पर्य्यासत् pro पर्य्यास्त. Invenitur etiam, teste Schlegelio, simplex आसत् pluribus in locis Râmâyani, ubi omnes comparati codices inter se consentiunt.

Sl. 12. *a*. Patronymicum Damayantiae a patris Bhîmi nomine derivatum.

Sl. 12. *b*. विद्युत् et सौदामिनी secundum *Amara-côshum* ambo fulgur significant. Teste Nîlacantho adjectivum सौदामिनी a सौदामन derivatur, nomine collectivo, quod ipsum a सुदामन् (annui pluviosi temporis nubes) venit. Tales nubes ita appellari dicit, quia „valde mundo vitam dant". Sunt nempe ejus verba: सौदामिनी प्रावृषेण्यमेघसम्बन्धिनी ॥ सुष्ठु जगते जीवनन् ददति ते सुदामानो मेघास् तेषां समूहः सौदामनः प्रावृट्कालः तत्सम्बन्धिनी ॥ सा हि अत्यन्तन् द्योतमाना भवती 'ति प्रसिद्धम् ॥ विद्युत् सौदामिनी ergo fulgur est, quod de annui pluviosi temporis nube procedit.

Sl. 14. *a*. Tschat. न च श्रुता.

Sl. 14. *b*. Tschat. चित्तप्रसादनी; et इव pro अपि.

Sl. 16. *b*. Nali cognomen, ab ejus regni nomine formatum.

Sl. 19. *a*. जातरूपपरिष्कृतान् सुवर्णपत्त्रान् । Sic schol. Nil. explicat.

Sl. 19. *b*. Tschat. वने निवसताम्.

Sl. 21. *b*. Tschat. न च सा कामयिष्यति. Sequitur hicce slôcus, apud Nîl. et in cod. sine scholiis omissus: तव चै 'व यथा भार्या भविष्यति तथा वयम् । विधास्यामो नरव्याघ्र स माम् उत्स्रष्टुम् अर्हसि ॥

Sl. 24. *a*. Omnes codices exhibent सखिगणावृता, ita ut, si lectio genuina est, primum compositi membrum sit सखि *amicus*, quod etiam de feminis dicitur, vel सखी

correpto ई, ad analogiam Comparativorum et Superlativorum veluti सतितरा, सतितमा pro सतीतरा, सतीतमा (v. Gramm. *r.* 249.). Pluribus tamen aliis locis (ut III. 12. *a.*) codices de lectione साध्वीगण inter se consentiunt, quod insuper L. II. 6. *b.* metro defenditur. Hanc ob rem non dubito, h. l. corruptam esse codicum scripturam.

Sl. 27. *b.* Inter hunc et sequentem slôcum omnes codices addunt semislôcum ex sl. 15. repetitum — कन्दर्प इव रूपेण मूर्तिमान् अभवत् स्वयम् — quem Schlegelii consilio omisi, quia ejus sensus utroque loco non idem esse posset; nam अभवत्, quod sl. 15. *erat* significat, heic *factus est* significaret. Si tamen retinendus esset, sequentium slôcorum ordine non turbato, antecedenti slôco eum adscriberem, cum slôci ex tribus compositi lineis non raro occurrant.

Sl. 29. *a.* Serpentes apud Indos magna veneratione fruuntur, urbemque in tartaro *Bhogavatî* dictam habent.

Sl. 31. *b.* Tschat. नलं वद.

---

## LIBER SECUNDUS.

Sl. 6. *a.* Tschat. न्यवेदयत न स्वस्थाम्.

Sl. 9. *b.* अन्वीयताम्, sic Tschat., apud Nîl. et in cod. sine scholiis, violato metro, legitur अनुभूयताम्.

Sl. 11. *b*. Tschat. स्वयङ्कृतैः.

Sl. 18. *b*. I. e. Hic mundus (Indri coelum) perennis eorum est abundantiae vacca (quippe qui omnia optata eis praebeat) sicuti mea est. Potest etiam significare ,,hic mundus perennis eorum est, sicut abundantiae vacca mea est''.

Sl. 19. *b*. Cschatriyorum animas in pugna occisorum Indri coelum (Indra-lôca) adire Brahmânica docet religio; quam ob rem eos hospites suos Indrus appellat.

Sl. 25. *a*. Tschat. तच् छ्रुत्वः pro ते श्रुत्वः.

Sl. 25. *b*. गच्छांमा, sic omnes codices.

Sl. 31. Genitivus pro dativo in Sanscrito frequentissime ponitur. Plura de vario genitivi usu dixi in annotatione ad Indraloc. I. 27. *a*.

---

## LIBER TERTIUS.

Sl. 2. *b*. Tschat. तत्त्वेन परिपृच्छामि कथयध्वं यथातथम्।

Sl. 4. *b*. नृणां, sic W., reliqui, violato metro, नृणां (vid. gramm. *r*. 182.).

Sl. 5. *b*. Ad verbum, ,,quorum magnus Indrus primus.'' Voces आदि et आद्य, *primus*, nominibus subjunguntur, ubi e variis rebus unius et primae solummodo exempli gratia mentio fit, et hac in constructione a sensu Latinae locutioni, *et cetera*,

respondent. Locus noster itaque verti potest, ,,mundi custodes, ut magnus Indrus,'' aut, ,,magnus Indrus et ceteri.'' Vide Gramm. *r.* 666.

Sl. 12. *a.* Cognomen Damayantiae, a patriae nomine derivatum.

Sl. 15. *b.* धर्षिताः अभिभूताः । Sic Tschat. schol.

Sl. 16. *b.* Tschat. अभ्यचिन्तयन् pro अभ्यपूचयन्.

Sl. 19. *a.* Nimis festinanter fortasse scripturam prioris editionis स्मितपूर्वाभिभाषिणी dissolvi in स्मितपूर्वा ऽभिभाषिणी, quod praetulerim, si Adjectiva suff. kridantico इन् formata (v. *r.* 645.) Accusativum regere possent; sed certa exempla talis constructionis nondum inveni. Nostro loco एनं स्मयमानम् ad नलं वीरम् referri potest, ita ut ab अभ्यभाषत regatur: ,,ei ridenti, risu antecedente alloquens (eum), Damayantia Nalo heroi dixit.'' Schlegelio non assentire possum, qui vocem स्मितपूर्वाभिभाषिणी perpetuam Damayantiae qualitatem designare putat. Non raro enim hujusmodi verbalia ad actionem praesentem referuntur; cf. Lib. XI. 21. et XXII. 2.

Sl. 20. *b.* Ad verbum, ,,noscere cupio tui.'' Infinitivus, qui verbi casum alias regit, hic substantivorum modo constructus videtur, quasi, ,,cognitionem cupio tui.'' Plura de Infinitivi constructionibus dixi in

ann. ad INDRAL. I. 16., ubi tamen, in loco e Râmâyano citato, pro मदीयन् नगरं यातुङ् कार्यं हि तावद् उच्यताम् melius cum Schlegelii editione, .... यातु कार्यं हि महद् उद्यतम्, legendum.

Sl. 21. *b*. TSCHAT. ग्रासीर् न लक्षितः

Sl. 25. *b*. NIL. महाकक्षम् per महान्तं राजद्वारप्रवेशम् explicat.

---

## LIBER QUARTUS.

Sl. 7. *a*. TSCHAT. इच्छति pro ग्रच्छीति, in qua recepta lectione codex Ud. cum reliquis convenit, ita ut haec forma generalem euphoniae regulam 36. sequatur, contra id quod *r*. 44. praescribitur.

Sl. 8. *b*. Omnes codices particulam तु tam post भूषणानि quam post प्राप्य exhibent.

Sl. 10. Yamus justitiae et mortis deus, quia cum Indro (aëre) Agne (igne) et Varuno (aquâ) tanquam mundi custos (लोकपाल) et mundi creator (लोककृत्) celebratur, hoc munere terram significare videtur. Quam ob rem maximi mihi est momenti, Dschemschitum, qui apud Persas primus est terrae regnator, cui Ormuzd legem suam primo tradidit eumque terram colere jussit, re vera eundem esse atque Indorum Yamum. Hoc non solum Zendico nomine Yimô (Nom. a themate Yima) cum यम convenienter demonstraverim, sed potissimum eo, quod in

Zendavestâ Yimi i. e. Dschemschitis (*yimahé csaêtahé*) pater idem est ac Yami pater, etsi id vix in Anquetilii scriptura Vivengham quaesiveris. Indici Yami pater est विवस्वत् i. e. Sol, ex quo Yamus nomen duxit वैवस्वत. Ita Sav. V. 40. विवस्वतस् त्वन् तनयः प्रतापवांस् ततो हि वैवस्वत उच्यसे बुधैः । «Vivasvatis tu es filius excelsus, inde enim Vaivasvatus appellaris a sapientibus.» Cum विवस्वत्, si legitimas et constantes respicis sonorum primitivorum in Zendica lingua mutationes, accuratissime convenit *vivanghuat;* स् enim ubique transit in *h*, cui, si *a* vocalis ei antecedit, et quaepiam vocalis sequitur, saepissime gutturalis nasalis, quam per *ng* scribimus, anteponitur. A themate *vivanghuat* descendit Genitivus *vivanghuatô*, quod Sanscrito विवस्वतस्, ante sonoras litteras विवस्वतो, respondet. Cum autem litterae *u* et *h* consuetissimâ transpositione locum suum commutent, ita ut e. c. pro *vanghuî pura* saepissime scribatur *vanguhî*, et a *kharĕnanghuat splendore praeditus* formetur Genitivus *kharĕnanguhatô:* non miraberis, etiam pro *vivanghuatô* scribi *vivanguhatô*. Ita legimus in Vend. Sade (ed. Burnoufii p. 40.): *Yimô Vivanguhatô puthrô* i. e. यमो विवस्वतः पुत्रः. —

In Nominativo Zendicum *vivanghuat*, abjectâ vocali *u*, format *vivanghâo*, quod ceterum ad Sanscritum विवस्वान् eandem habet rationem quam, e.c., *vîdvâo sciens* ad Sanscritum विद्वान्. Sanscrita Nominativi forma विवस्वान् (a fortiori themate विवस्वन्त् abjecto त् ex gramm. lege r. 57.) non tamen plane interiit in lingua Zendica; descendit ab ea, ut mihi videtur, patronymicum *vivanghana* (Nom. - *ô*) eodem suffixo quo वैवस्वत deducitur a विवस्वत्. Vriddhis incrementum, quo saepe prima in Sanscritis derivatis vocibus afficitur syllaba, in lingua Zendica hucusque in iis tantummodo observavi vocibus, quae in prima syllaba *a* vocalem habent. Ita, ut aliquot exemplis hoc illustrem, ab *ahura* (deus vulgo Ormuzd dictus) suffixo *ya* venit *âhûirya*, cujus Genitivum *âhuîryêhê* (*âhûiryêhê*?) invenies Vend. Sad. p. 29., et Accusativum *âhûîrîm* (*âhûirîm*?) p. 20. A *mazdayaśna* (Ormuzdis assecla) venit *mâzdayaśnya*, cujus Accusativum *mâzdayaśnîm* exhibet p. 22., qui tamen, sicut *âhûirîm* etiam a themate suffixo *i* formato deduci possit, cum *î* ante *m* finalem legitime producatur. A *vĕrĕthraghna* vel *vărĕ*... (Scr. वृत्रघ्न *Vritri occisor* cognomen Indri) *victoriosus*, venit *vârĕthra*-

*ghnya*, in Nomin. *vărĕthraghnyô*, unde descendit superlativus *vărĕthraghnyôtĕma*, quod saepius invenitur V. S. p. 327. et 328. ubi Accus. *vărĕthraghnyôtĕmĕm* videtur esse adverbialiter positus — *imann vaćô drĕngayôis yôi anghĕn vărĕthraghnyôtĕmemća baĕsazyôtĕmĕmća, haec verba dicas, quae sunt victoriosissimaque saluberrimaque, welche sind am siegreichsten und am heilsamsten.* Superlativi suffixum *tĕma* heic, et, nisi fallor, ubique in codd. mnscr. a voce ad quam pertinet, puncto est separatum; praeterea nota Accusat. pl. *imann* pro Scr. इमान्. Plura de linguae Zendicae grammaticis legibus disserui in Annal. Berol. a. 1831. m. Jan. et Dec.

Sl. 12. Vel „si cogitas Varunum" cf. I. 21. — Schlegelius et Rosenius slôcum quo Varunus celebraretur — eodem jure, quo antecedentibus slôcis Agnis, Yamus et Indrus — omissum et hoc loco वरुणं pro वरूणं legendum esse putant. Quâ valde probabili conjecturâ receptâ, vertendum esset: «Fiat sine dubitatione, mente si putas (si tibi placet), electio e mundi custodibus." Sic nempe, si अविशङ्केन (ex अ et विशङ्का) adverbialiter est positum, et, quod plerumque accidit, prius hemistichium, vel lineae

